।चिदस्थिमाला

लघुशब्देन्दुशेखर ~~टीका~~ इति:

१८

८६ पन्नानि

श्रीः

काली जयति कल्पान्तः कालिकुंजरकेसरी ।
[illegible] [illegible] [illegible] [illegible] ॥
अनन्तमेतु [illegible] [illegible] [illegible]
कालि [illegible] [illegible] [illegible] ॥
हकालेन [illegible] काश्रीनाश पुरवास [illegible] पामरं ॥
[illegible] ध्यानसमसिंत [illegible] सेमामर [illegible] ॥

१ श्रीगणेशाय नमः॥ निराधाराधारं निखिलजगतां पारमुदधेरिव स्फाराकारं विमलमसुखलक्ष्यप्रसु
रुचिरं ॥ चिरं धारं धारं मनसि गुरुजीवीणरूपयापरं वं देवं देहग्रहरमहं श्रीकरवरं ॥१॥ नत्वा
गुरुं वैद्यनाथः पायगुंडाख्यकोविदः ॥ सदस्थि मार्त्तंडतनुते लघुशब्देंदुशेखरे ॥२॥ ग्रंथसमा
प्त्यादिप्रतिबंधकदुरितध्वंसनाय समुचितस्वेष्टदेवतानमस्कारात्मकं मंगलमाचरन् शिष्यशिक्षा
यै व्याख्यातृश्रोतॄणामनुषंगतो मंगलाय च निबध्नाति। पातंजलेइति। तत्रास्य चेरकादिसा
व्याख्यानपाताह। महेति। वैद्यकप्रकरणपान्वयाभावाय महत्त्वविशेषणमिति कश्चित्। स्वरूप
कीर्त्तनपरं तदित्यन्ये। विशिष्टमेतन्नामेति तदित्यपरे। पातंजले योगसूत्रे चादौ महाभाष्ये च
सर्वः। आद्योत्पत्त्यास्वस्मिन्नतत्त्वतत्त्वस्य वनच्छाराप्त्यत्वस्वो स्त्रीनां ताविकस्वंस्य चित्तमिति बो
ध्यं। तत्र कृतपरिश्रमत्वस्याप्रीतिसंकेतत्वादाह। हरीति। त[illegible]वतां सिद्धान्तार्थ[illegible]ज्ञातत्वस्य
वनच्छारास्वस्मिन्नस्तीयेतदनुरोधित्वं सम्यक्लौख्यात्र प्रतिपादितमिति बोध्यं। पित्रादिकीर्त्ति
येत्याह। शिवेति। ननु तत्र तत्र हेपि सूक्ष्मतेरभावात्कथं तत्सूक्ष्मार्थीकलनमत आह। श्रीमा
निति। ऊहापोहकुशलः। सतीदिव्या इत्यत्र संज्ञात्वेनाभावितपुंस्कत्वान्न पुंवत्त्वं। न च संज्ञा
दूरण्योक्तेति निषेधसामर्थ्यात्तत्त्वेपितत्त्वमस्तीति वाच्यम्। तत्र तत्सामर्थ्यात्त्रेनं योगसूत्रस

७ वस्तुतः

शिवं॰

ग्रहणमिति तत्र योगार्थे तावच्छेदकमादाय भावितपुंस्कत्वेपि स्तू तत्प्रयोगे तावच्छेदकारोपेण संज्ञात्वे
नात्र तत्त्वस्य दुर्वचत्वात् । अत एव इत्था भार्येत्यादितश्चोदाहृतमाकरे । एवं च क्रियाप्रवृत्तिनिमि
त्तकदेवतादिसंज्ञानामिव तत्र ग्रहणमिति बोध्यं । तेन निषेधेन भावितपुंस्कत्वमिव बोध्यते
सिद्धानुवादत्वाघवादिति केचित् । दीतं नामस्त्रीणामित्युक्ते देवीत्युक्तं । यद्यपि दाइत्युक्तेपि तत्प्रसि
द्धिस्तथाप्यस्य फलमनुपदमेव स्फुटीभविष्यति । तुः पादपूरणे । सर्वविशेषणसमुच्चायकत्वे
न चार्थे वा तदनु क्लिष्टनयोरिव मिथः समुच्चयो न सर्वेषामिति भ्रमनिरासाय । वस्तुतस्तु
मनुष्येषु तत्वेपि देवीगर्भजातमिति वैलक्षण्यस्तवनद्वारा तस्याः सर्वतद्धर्मवत्त्वस्तवन
द्वारास्वस्मिन्नपि वास्तवमहदेवस्तवकत्वमिति बोध्यं । ननु सदा प्रतिग्रहपराणामेव नान्धिना
मतिविनाशात्कथं पंथ्यीमनमत आह । पावकानामिति । अन्नदाता भयत्राता पंचैते पितरः स्मृ
ता इत्युक्तिस्समपि कीर्त्यते इति याचेति । अभेदरूपकद्वयमिदं । तत्राद्येन पावकवाच्छिदादत्व
स्तवनद्वारा तत्र सर्वोत्कर्षः सूचितः । अरय एव कक्षाणि तृणानि तेषां । अनेन न विजातीय
भूरत्वं रणेपमारयंती यो न ध्वंसते वेति यावदिति सूचितं । रामतः । रामसिंहात् रमात् । नामै
कदेशो नामग्रहणं । तत्फलं तत्र तत्त्वस्तवनद्वारा पुण्यशीलत्वस्तवनद्वारा तत्रोपादेयत्वस्तव
नं । क्रियाकारकयोर्नित्यसाकांक्षत्वेनैकदेशान्वयः । [illegible] जीविक इत्यनेन तत्प्रयोगेस्येवा

२

वश्यकवेधतदन्यथानुपपत्त्या स्वीकार्यो नत्वोभादिनाट्यिकस्येति संक्षेपार्थः। तत्र लक्ष्येत्यनेनना
द्यप्रमितिग्रहाभावाद्याप्ताभावः स्विच्छया भावग्रस्तवृत्तिः। कणीशं। पर्तंजलिं। तेयं इति। तथा
श्रा३ थिप्रकाशकं प्रकृतग्रंथसिद्धार्थप्रकाशकं वेत्यर्थः। ननु मनोरमाग्रंथ्यादेवेतदर्थप्रकाशो सिद्धु
क्रिमर्थमयमतआह। मनोरमामनिसि मनोरमैवोमा मनोरमोमा साम्बः देहोयस्येत्यर्थः।
ते५ एतेनत[illegible]त्रानुक्रमणीमत इति तथा नगरार्थी[illegible]तिसंक्षिप्तं। लघु। कलात्मकः। शब्दरूपं दुर्वो
खरेयस्य शिवस्य सः। शब्दरूपं इंदुरिंदुरिव शार्षिशेखरो मस्तकं सुखो यस्य प्रतिपाद्यप्रतिपा
दकभावसंबंधेन सग्रंथो लघुत्वविधि[illegible]हस्तमित्यर्थः। यद्वा। लघवः शब्दाः यस्मिन्स लघु
शब्दः लघुश्चासौ शब्दश्च लघुशब्दोवाङ्मयमिंदुशेखरमित्यर्थः। आदिनास्थितिपरिग्रहः।
ग्र्यपृ६ समुपविशेति। यो[illegible]त्यर्थः। एतच्छास्त्रप्रवर्तकत्वात्पासामर्थ्यववाद्धेति भावः। अनुषंगतः।
संबंधतः। ननु नमस्कुर्मो न[illegible]होसिंयेसाद्दिव नमःस्वस्तीति चतुर्थी स्यादत आह। का
रकेति। कथात्पस्थाप्यक्रियानिरूपितकर्मत्वात्कर्मणोरिति षष्ठी तु न। नलोकेति
निषेधात्। द्वष्टांतेतु क्रियार्थोपपदस्येति चतुर्थी तथाप्यविगमात्। नमःस्वस्तीतिचतु
र्थीतु[illegible] नमःशब्दयोगे चरितार्थेति भावः। एतेन जहत्स्वार्थादिपक्षे नमःशब्दस्यान
र्थक्यादर्थवशा[illegible]हणपरिभाषया चतुर्थी नेति दंसुकमपास्तम्। देवान्नमस्कुरुते इति साह

श्रीवं. २

तुं

उक्तयुक्तेरसंभवात्। तस्याप्यांतरसत्वात्। प्रक्रियादशायां तदनंगीकाराच्च। प्राचामित्युक्त्या बहुवचनांत
समासः सूचितः। तेन सर्वेति रैं सिद्धिः। तस्य प्रक्रांतपरामर्शकत्वादाह। मुनीति। मुनित्रयेत्युक्त्ये
कवचनांतसमासः सूचितः। यद्यपि समुदायोक्तमेकं न किमपीति मुन्युक्तिष्वेव पर्यवसानमि
ति प्राग्वत्सूचितं तथापि सति संभवे सर्वनाम्नां प्रक्रांतप्रधानपरामर्शित्वादेव मुक्तं। प्रायः सिद्धं
तस्यैकस्मिन्नसमहोक्तस्यैकस्य तस्य संभवाच्च। एतेन तथादं अनुक्रमपास्तम्। नन्वत्र पक्षे कोऽशवि
शेषोऽतआह। परीति। पातोरिति। एतेन पञ्जंतस्य तस्यैव तद्बोधकत्वमुक्तं कोशादिरपास्त
मापरिभवतीत्याद्युतोपितमतीतेः। ननु ध्यातूनामनेकार्थसंगमकत्वे एवातआह। अतए
वेति। तेषामनेकार्थत्वादेवेत्यर्थः। इतीति। इत्यत्राप्तवत्ताने इति विशेषणमित्यर्थः। मनन्परिभा
मेति श्रीहर्षप्रयोगादर्युक्तत्वदोषध्वंसकानेति भावः। उक्तार्थद्वयस्य क्रमेण फलमाह। एतेनेति। उ
क्तार्थद्वयार्थक द्वितीयत्र्यबंतेतकथनेनेत्यर्थः। तेनेति पाठे त्वेवं। स्वपंगस्य। कौमुदीरूपस्य।
ध्वनितमिति। आगतार्थेत्यत्र लिंगविहिताने नान्वयः। भाविनोपीति। गंथस्येति शेषः। नन्वे
वमयमित्युचितमिति वाच्यम्। कौमुदीगत लिंगारोपेण तथोक्तेः। आरोपफलं तूपमायालिं
गभेदजदुष्टत्व निरासः। यद्वा। भाविनोऽप्यर्थस्य बुध्या विषमीकरणस्यान्यत्र दृष्टत्वात्। भाविसत्त्व
विवक्षितेरियमित्यनेन बुद्धिस्थत्वात्परामर्शः इत्यर्थः। सिद्धांतेति। वैयाकरणसिद्धांतस्यांधका
रे घटपटादिसंघायेत। सिद्धांतस्य च प्रकाशिकेत्यर्थः। ननु वैयाकरणसिद्धांतरूपस्फोटस्यात्रा

प्र ६ स्फा ८

निरूपणात्तदप्रकाशकत्वात्कुत्वं तेन साधर्म्यमत आह। अतिदुरूहेति। महाभाष्यादिग्रन्थ इत्यर्थः। सिद्धां
तपदेन प्रक्रियायाः सिद्धान्तोऽत्र मूले च विवक्षित इति भावः। सिद्धान्तज्ञानेति। संपादनीयसतीति शेषः।
साधर्म्यमिति। तद्विशिष्टकौमुदीपदं लाक्षणिकं तथा चोपमालंकारो व्यंग्य इति भावः। अनेनेति। सि
द्धान्तकौमुदीसंज्ञेन। आदिना प्रतिपाद्यप्रतिपादकभावसंबन्धपरिग्रहः। अइउणिति। ननु का
न्येतानि सूत्राणि। न च संज्ञासूत्राणि। क्रमविधायकत्वात्। अत एव यमामनुमीत्यादौ यथासं
ख्यनिर्वाहोऽत आह। एषामिति। वृत्तीति। प्राक्रिया हकर्तेनेत्यर्थः। ननु कल्पमेकस्मादुभयम
त आह। क्रमस्येति। शास्त्रे सर्वत्रेति शेषः। एवं च नान्तरीयकत्वेन तत्सिद्धिरिति भावः। चस्त्व
र्थे। तद्दर्शनेनेत्यस्य तदित्यादिः। इदं लक्षणदर्शनेनेत्यर्थः। एतदुपयोगः स्फुटीभवि[—]ष्यतीत्याशयेनेति।
अवयवत्वेन बोधकार्थं तत्पदात्क्षिप्तादिघटित मध्यगानामित्यर्थः। यथैव मन्त्रस्य न तथास्फुटीभ
विष्यतीति। प्रासंगिकमाह। लोप इति। यदा। उभयार्थत्वमात्र मन्वत्रापि दृष्टमित्यत्र नपितु
माह। लोप इति। एतदेकवाक्यतयेति। आदिरन्त्येनेत्ये[—]त्पारैकवाक्यतयेत्यर्थः। इदं च सूप
इत्याद्यर्थमावश्यकं। नन्वेवं विप्रतिषिद्धस्यादत आह। स्वादीति। आवत्येति भावः। नन्वत्र गुणा
दिकं कृतेनारस्यत आह। एष्विति। तथानिर्देशेन तद्विवक्षानुमीयते न तु तत्करणे दृष्टनिर्देशा
नुपपत्त्या। व्याख्यानतो [—] निर्वाहात्। एतेन यत्स्यनलोक[—]स्थौ ओतोमित्यादौ दृष्टस्या
न्या[—]य प्रतिपत्यात तयातद्विव[illegible]इति भावः। नन्वेवमपि प्रत्येकं विभ

॰क्तिः कुतो न। न च तयोर् भेदपक्षे स्वरूपस्यानुकार्यस्य वा श्रोत्रग्रहीतत्वेन सादृश्ये नोपस्थिते वोदत्तस्या
वान्तरादेशाद्यविरोधाभावे नाप्रातिपदिकत्वमिति वाच्यम्। एवमपि भेदपक्षे स्वांगीकारेण दोषस्यादत्त
आह। अनुकरणेति। तत्र भंगमितीयत्य॰र्थः। ननु नेदमनुकरणमपि परत्वादत्त एवेतः सनकाद्युद्धा
रः पाणिनेः सूत्रात्मत्वेतः शब्दमात्रबोधोऽत आह। सौत्रत्वेनेति। अनेन सूत्रे एव तस्य प्रयो पा४
गो नान्यत्रेति सूचितं। अन्यथा निपातत्वान्नेति वदेत्। वर्णेभ्यः। प्रत्येकमिति शेषः। अग्रे
प्यस्यैतादृशस्यानुषंगः। बाहुलकात्। सौगारख्या यामिति बहुलग्रहणानुवृत्तेः। मतुकारप्र
त्ययस्यात्राप्राप्तिरिव क्रमबोधत्वे केन वर्णा बोधकत्वादिति। तन्नो समन्हस्यत्वे पि प्र
त्येकं तत्त्वानपायात्। के यकत्वामर्थबोध्यकौ कौस्तुभ खंडिकां र॰ना करो त्विं खंडयति
य हितेति। संधिः किंवर्णोपदेशकाले उत संधिशास्त्रनि॰ष्पत्त्यनंतरमा पाद्यते तत्राद्य
पत्राभावे हेतुः कैयटेनोक्तो वर्णोपदेश इत्यादि तत्राद्यपक्षे स्पष्ट एवापत्तिः। अंत्यपक्षे तु ते
नोपजीव्यविरोधः सूचितस्तदभावसाधकत्वेन। तमुपपादयति। तथाहीति। तदि
ति। आद्गुण इत्यादीत्यर्थः। एवमग्रेपि। अक्षरसमाम्नाय इत्यादिः। गृहीतेति। आदिरंत्येने
ति शास्त्रेणेति भावः। पश्चात्। वर्णोपदेशाद्यनंतरं। अत्रापि। अक्षरसमाम्नायेपि। विरु
द्धेति। उपजीव्य महत्वशक्तिग्राहकमानविरोधापत्तेरिति शेषः। तत्र हेतुमाह नहि

त्वेन तद्विरोध्यापत्तेश्च। किंच। इदंद[illegible]पयेइ सस्यसौत्रेइत्तं साजात्यादौ वीइति वाच्यः। नाद्यः। यस्येति च न लोका
मयञ्जौ तो मित्सादादव प्रवृत्त्यापत्तेः। तद्विसूत्रस्य प्रामाण्यविरोधापत्तेश्च। अत एवांसोपि नेति दिक्। माहेश्व
राणीमपि कौ हिं सफलयितुमाह। न[illegible]ति निवि। अवहारेति। शिक्षाभाष्यादिकृते स्यादिः। वेद एवेति। तद्
ति। न चैवं तुल्यास्यसादेतीप्रवीयप्युक्ता सालनस्यादितिवाच्यम्। शास्त्रयोः पौर्वापर्येण्यानु
पपत्तेः उपजीव्योपजीवकभावाभावात्सवर्णसंज्ञाया सूत्रोपजीव्यत्वादिति भावः। अ
जिति। अजादिसंज्ञायाइत्यर्थः। स्यात्संतिरे। विकल्पेषु। संदेह इति। तथा चावि
कृतानामेव संज्ञिर्लाभ इति भावः। यत्तु क्रमबोध्यकेवर्णोपदेशो गुणादिप्रवृत्तौ सुपा
मितिसोऽर्तुकिपरत्वादत्रोपधाकल्यस्येति प्रवृत्तसाट्गुणि[illegible]सद्गुणितिवास्यात्। तथा चैका
रस्याजादिसंज्ञानस्यादिसाध्यायेना[illegible]जादिसंज्ञानस्यादित्युक्तं। न च संदेहस्यानि
वृत्ति ईरस्यानादितिवाच्यम्। ईदूदिदितितपरकरणेनेदृशोविषये तस्याप्रवृत्तिज्ञाप
नादितिमंदः। तत्त्व। तथासत्यजादिसंज्ञानस्यादितिवाच्ये ऽजादिसंज्ञानामनिष्पाद
दित्वस्यासंगत्यापत्तेः कालनि[illegible]प्यादपदयोरेवंसति नि[illegible]फलत्वापत्तेश्च। अजादिसं
ज्ञाभावे साध्ये हेत्वनुक्त्या वाक्यस्याप्रयो[illegible]जकत्वापत्तेश्च। संध्यभावे हेतुत्वाभावे नास
वर्णत्वापत्तेश्चेत्तौ। विभक्त्यनुसंधिं प्रतिपाद्यस्वरसंधिस्त्वेनेति तदुक्तौ पंगे स्वारस्येन तदनु
सूत्रे रेवस्फुटत्वेन सुपामित्यादिपरत्वेन कैयटप्रयोजनस्यासंतानौचित्यात्। अक्ष्याद्यार्थत्वा
च्च। इदस्य लेप्यप्रवृत्तौ परिभाषाया निर्विषयत्वापत्तेश्च। गुणांतरमुक्तं संग्र्ह्य यतपर
करणस्य सूत्रमते [illegible]भेदकपक्षसत्वे नावैयर्थ्यमित्र। भाष्यमते ऽभेदकपक्षेतत्स्यप्रत्याख्यातं
वर्णेऽवेत्यर्थः। आम्नायस्य क्रियार्थत्वाद्[illegible] इति भावः। अत एव श्रुतिः स्त्रीवेद आम्नायइ
त्यमरोक्तिः। चंद्रोदये वितानेव स्यादाम्नायोन्वयेश्रुता विद्यादीनां नार्थकोपाद[illegible]कृतेपि तत्र प्रसिध्यभावस्त्

यत्नुरत्नाकररुत्कृते ग्रंथे इत्यर्णा तेन रुतानीत्यर्थः। न चात्र नमानां ये नाक्षरे त्रिशिक्षावचनस्येवमा
नत्वादिति वाच्यं। तथा सति श्रुतिस्मृत्याभावापत्तेस्तं ध्वनयन्नाह। महेश्वरादिति। तत आगत इत्यण्। ननु
इदं वाच्यमिति मतं अत आह। महेश्वरेति। एवं व्याख्या कृत्वा माहेश्वं चैवमिति। महेश्वरा दागतानीति व्याख्या
नेचेत्यर्थः। तत्र सामान्यतो लब्धा एषा चतुर्दशसूत्र्युत्कानुपूर्वी काक्षतिरेवेति समुदितार्थः। एवं चानादित्वे
३५ नाष्टाध्यायीतोऽस्या वास्तवे नत्नलात्तत्रहारो नानुपपन्न इति भावः। तत्फलमाह। कृतीति। अस्येति। एवं
नव्याकरणीतरनिराक्षोनांन्यांगानां सत्याजात्यात्। अत्राकृतिरियं तत्प्रसादलब्धेति उक्तार्थे। अन्यथाऽधि
गम्य महेश्वरादित्यनयोरर्थारसंस्पृष्टमेवेति भावः। एतेन पंचवंशतो किंवदंतोऽनुरोधादिति सामान्यस्यावि
शेषपरत्वेन मानमित्यपास्तं। एतेन महेश्वरेण प्रोक्तानीत्यपि व्याख्यानं निरस्तं। एवं सति प्रकृतं भाष्यविरो
६४ धं परिहरति। ननु लिखितेति। अस्यत्वाकारेणान्वयः। यदा इत्याहोइति भाव्यादौ इत्यत्र वैयधिकरण्येनान्वयः। आ
दिनाऽव्युत्पत्तिपक्षाश्रयेणाचार्योद्दिष्टः टकारः वार्तिककारस्तु व्युत्पत्तिपक्षाश्रयेण प्रत्याहारघटितसमानेत्येवे
तीति। कृत्स्नत्वं सूत्रस्य केयटस्यत्वे पौचार्यस्येति भाष्यान्तरस्य ग्रहणं तन्नेवमपि तद्विषयप्रवृत्तिर्दुर्घटं मुक्त
मुक्तेरत आह। अनुवंधाश्चेति च सत्वपि। एतेनानादित्वव्यवच्छेदः। नन्वेकं पंमानुबंधप्रत्याख्यानमत आह)

पे ट

न त्र समासो वर्णदेशवारं स्यात् लत्वं प्रकटयितुं छक्कोऽनननादयत्रादेत वद्दुत्व णो लकमा [illegible] यमतिर हसं
पाणिनिशिवप्रसादलब्ध सूत्रसमूह [illegible] माहेश्वरीकेश्वरो विस्त्रवो विचार्य स्फुटीकरोमीत्यर्थः।
त्र मेति। अपिना एदद्दार्थे समुच्चयः। इत्येवं विचारपरमिति। इत्येवं विचारपूर्वकादर्थायैतत्प्र
तिपादनपरमित्यर्थः। प्रसंगादाह। सर्वत्रेति। पाणिनीयेऽभ्यासेष्वपीत्यर्थः। एवं परमेव। उ
क्तान्हर्यकमेव। अन्यथा। उक्तानामर्थानंगीकारे। अपिनाक्षतिपरिग्रहः। तत्र तत्रा। आवि
नाप्रत्याख्यानसमुच्चयः। तदिति। सर्वत्रप्रत्याख्यानस्यैतत्परत्वमित्यर्थः। सूत्रेष्विति। भा
ष्येषु त्रिदोषः। सामर्थ्ययोगादिति। ल्यप्लोपे पंचमी। सामर्थ्यमुक्तं विहायेत्यर्थः। शुद्ध
ष्पार्थ वस्तोऽभावात्तदनुल्लेखः। मन्ये वमपि प्रत्याख्यानपरमाष्यासंगतिरिव दृष्ट इत्यत्र
स्य भाष्यविरोधादत आह। वृद्धिरिति। इतिरसंगलभावे पूर्वस्य हेतुत्वबोधकः। निष्प्रयो
जनत्वेति। दृष्टप्रयोजनशून्यत्वे [illegible] त्यर्थः। आनर्थक्येनेसस्यप्रत्याख्याने [illegible] न्वयः। अ
स्योक्तेऋति तं द्रढयति। अतएवेति। वर्णसमाम्नायस्य ऋतित्वादेवेत्यर्थः। अनुच्छित्तं। शा
स्त्रकर्तृकत्वेन परिच्छिन्नेनेत्यर्थः। एवमेव। उक्तानुपूर्वीकमेव। नन्वाधुनिकत्वनिवेशो
न विरंतनः कर्ता [illegible] ऽध्वोऽतआह। शारीरीति। एतेनवेदस्य सकर्तृकत्वे [illegible] दृष्टापत्तिरिति
सूचितं अनुबंधानां सादित्वं प्रतिपादयन् तत्र तत्र मानांतरमाह। उक्तमिति। स्वालत्वं वा
गायत्र्योचरमितिज्ञापनाय छक्का [illegible] निनादव्याजेन सनकादिसिद्धानुद्धर्तुकामोनटरा
जराजः अनेन मंगलादीनिदर्शितानि। विश्वरूपविलासवैवि अवम कौवीव्रणबाहवौ २१
अवेति। एषु नादरूपे [illegible] षु सर्व [illegible] षु सूत्रेष्वित्यर्थः। [illegible]। अत्र सावर्ण्यप्रसक्तेर्दृष्टाय स्मिन् समेरु रूप
सरूणादिज्ञातानुबंधसमूह रूपं। समासांतः अत्र सावर्ण्य [illegible] दृष्टानसंख्या [illegible] वीयस्मिन् तस्मात्तांतरमन्यत्रो

यिर

धातुमूलेति। धातुमूलकोयेशब्दोसा त्रीति पादकृशास्त्रेरसर्थः द्वितीयपयोके भाष्यमुपि
मानमाह। तरावेति। अनुबंधानां सादिलादेवेस र्थो अनतरावेसस्यार्थध्वनेहेतु माह। क्रेति।
उक्तभाष्येरसर्थः मन्वेणमपिकथं माहेश्वर कृतायलाभोअन्येशिष्य कृतेवस्यापिरतिभवाद
तआह। तत्कररणमिति। तेन अनुबंधोकरेणार्थश्चेति भाष्ये एाइ इमेव द्रष्टव्य जिअचेति।
उक्तकाशिकायामि सर्थः तत्वहेतु लेनो उक्तयतिशेषः। अस्पंदकानादस्या। तत्रबजे
परेशास्वरूपहेच। श्रुतिवेति। वर्णसमाम्नायेति भावः। अनस्वगीतासु परेशादेस्तुनत्रै
लोपदेशास्वरूपहं तस्यधनंजययुद्धप्रवर्तिमावप्रलक्षतात्। इतिनतत्रापिवेदत्वापसापिंसभिद
भिसपास्तं। उक्तमेवद्रष्टव्यितुमानेमाह। कृतंवेति। आहेतिशेषः। अक्षरध्वंदः स्वरूपंसमुत्को
तंस्मिन्यगनुबंधमेराह शिर्तिं। तथामयेतिशेषः।। तवद्दशांतमाह। यथेति। सामान्योक्तं विशिष्या
ह। अलेति। तथाकेथनामात्रेहेतुमाह। अलेति। यतसाहि। नलुनोयंअन्यशिसस्यैकत्वातृणा
पिश्रुति। रशि सत्वस्यसमूहनिष्ठत्वादितआह। अवप्रेति। तत्रचंअवप्रति पादकेहंचअः

स्वरं [?]
स्पंद [?]
निसूवेद
४

तरधू [?] दूर [?]

नु४

परमेश्वरान्निर्गुणाद् मायामात्रिसहः मापकः सगुणोऽभूत् आसीदित्याद्यर्थकाग्निमतदीय
पद्ये ति संपः । नन्वेवं व्याख्यानं स्यादित्वेन प्रत्यासत्त्योपदेशाकर्तृकर्तृकत्वलाभेपि उपदेशो
ऽन्यकर्तृकत्वमेव कुतः पाणिनिकर्तृकत्वस्यापि संभवादत आह । अतएवेति । तेषामन्य
कर्तृकत्वादेवेत्यर्थः । व्यतिपदार्थमाह । शास्त्रप्रवृत्तीति । अत्र विशिष्टलोपव्यवहरणं पाणिनेरि
त्युपस्यात्रैवान्वयः । नित्यसाकांक्षत्वात् । शास्त्रदर्थ इति । सर्वोध्यत्वेनार्थः प्रयोजनं यस्य सद्भूत
र्थः । ननु वर्णसमाम्नायस्य साक्षाच्छास्त्रप्रवृत्त्यर्थत्वमत आह । सत्वेति । समवायश्चेत्यर्थः ।
सति सक्षर समाम्नाये टणादिसंज्ञाद्विनिर्जीव [illegible] वेन शास्त्रप्रवृत्तिरिति ग्यणद्ध्यात्यौय
पासंरभप्रवृत्तिश्चेति भावः । एतदाशयेनैवोक्तं । क्रमस्य संज्ञाद्वारेवेति । अनिनाऽस्मच्छास्त्र
बहिर्भूतत्वं सूचितं । अतएव मंगलार्थं महतः शास्त्रौघस्यादितो वृद्धिशब्दं प्रयुंक्ते इति
मा [illegible] त्वं संगच्छते । अतएवेत्यस्यार्थे [illegible] सूत्र यन्नाह । एवं चेति । तस्योक्तफलक [illegible] सोक्तो
त्वेत्यर्थः । स्पष्टमेवोक्तमिति । पाणिनिशास्त्रप्रवृत्त्यर्थ उपदेशाद् लुप्तेऽनुपदेशो गुरुकर्तृता
याः स्वरसतः प्रतीतेरिति भावः । नन्वेव [illegible] मुपदेशव्यवहारेण तस्य वाह्यात् तद्रूप [illegible] नवि शेवः
षयकत्वेन वर्णानामपि सादित्वापत्त्या गुरुकार्प्यसंगतिरिवात आह । मंत्रोपेति । अत्र । ननु

सर्वत्र। तथा च सिद्धेऽक्षारणेऽपि तद्व्यवहारान्न तदसंगतिः। अत एवाष्टक उपदेश उच्चारणमित्याद्ये
व भाष्ये उक्तं न त्वाद्योच्चारणमिति तस्य च ढक्कानिनादेनाभिव्यक्तिरित्यर्थः। एतेनोपदेशापु
दप्रयोगादनुबन्धवर्णानामपि साधुत्वमित्यर्धजरतीयं हेयमित्यपास्तम्। ब्रह्मराशि
संप्रदाय इति। अत एवेति। ब्रह्मप्रतिपादकत्वादेवेत्यर्थः। एतदिति। नान्यपरा। नापि पाणि
नीयपरेत्यर्थः। इदं गर्गस्तु प्रागुक्त एव। तत्प्रयोजनमिति। साक्षाद्वर्णसमाम्नायप्रयो
जनमित्यर्थः। अत एव वक्ष्यति। संज्ञाप्रणयनं चेति। एतेन लक्षणत्वादिकं भाष्योक्तमव्यानु
षंगिकत्वान्नोक्तमिति निराकरणोक्तमपास्तम्। तस्य साक्षात्फलत्वात्। अन्यथा लोकप्रसि
द्धमातृकापाठे नैव कलादिदोषरहितवर्णस्वरूपज्ञानसिद्धेः कस्यचित्साधुत्वाप्रतिपाद
नाच्चादृष्टार्थे मानाभावाच्च वैयर्थ्यापत्तिरिति भावः। तथा च सूत्रे चतुर्थीसमासो वो
ध्यः। नन्वेवमपि संज्ञायामत्रानुपादानात्कथं तदर्थत्वमत आह। एतच्चोपेति। एषां क्रम
बोधकत्वेपीत्यादिनेति शेषः। आदिरन्त्येनेति सूत्रेण क्रियमाणाणादिसंज्ञासन्निवेशवि
शेषं विना दुष्करत्वादिति भावः। संज्ञाफलमाह। संज्ञेति। वृद्धिरादैजित्यादिद्वत्वाद्युक्तक्र
मं विहायैतत्कथने संगतिमाह। संज्ञेति। तेन। अस्यत्वेन। इदमित्यादिनासूचितामसूवि
माह। परेत्विदित्यादि आकुरित्संतेन। अस्य। लणित्यकारस्य। एवमग्रेऽपि। त्रेतीति। अनुस्वा
रं विहाय सूत्रैकदेशानुकरणं। र्थः। अर्धमात्राकालाच्चवादिति भावः।

दोषांतरमाह। किंचेति। अनुनासिकत्वफलमाह। अस्येत्संज्ञेति। यणिति। तद्भिन्नव्यतिरिक्तेत्यर्थः। व
त्रर (ऋ) चिति। येयत्र लाघवसंज्ञत्वस्ति पुनवृ सर्वत्रेत्यर्थः। दोषांतरमाह। किंचेति। अस्येत्संज्ञकत्वे
इत्यस्यानुषंगः। अस्याव्यापकत्वापत्तिरित्यत्रान्वयः। ग्रहणाभावे इत्यस्य भाष्योक्ते इत्यत्रान्व
यः। इतिइत्यत्र। रती ग्रहेत्तोः। लोपस्य वलत्वव्याप्तिरिति हेतोः। अव्यापकेति। पक्षतावच्छेदकाव
च्छिन्नवृत्तित्वरूपव्यापकत्वाभावापत्तिरित्यर्थः। तदुपपादयति। रवेत्यादिना। तवेति। मतेइति
दोषः। नन्वेवं ऋस्वानुनासिकाकारतत्रप्रवेशेपि न दोषो लक्ष्याभावादत आह। अस्याहरेच्चि
ति। तल्लक्षणे रण् ग्रहणं खंडनायेति भावः। एतेन तत्रानुनासिकपाठेपि लक्ष्ये अनुनासिक
त्वेपि ततोव्यक्तिभेदेन भिन्नत्वान्न दोष इत्यपास्तं। अकारेति। अकारजातीयत्यर्थः। हे आन्
त्रायद् मांसेचेति लक्ष्यार्थः। अनितेः किं वंतस्यानितिरूपं न तु किमनुनासिकत्वसमानाधिकर
णजातिनिर्देशात् ऋस्वत्वसमानाधिकरणजातिनिर्देशस्तत्राद्ये आह। अनुनासिके
ति। तस्य हल्त्वेन ततः पूर्वमकारस्य मोनुस्वार इत्यनेनेति भावः। अंत्ये आह। सोस्तीति। एत
त्तदेरित्यनेनेति भावः। इदं चकौस्तुभाद्यनुरोधेन। वस्तुतो गुणाभेदकत्वस्य व्यापकजातिनि
र्देशस्य च भगवदभिमतत्वेन सर्वत्र दोष इति बोध्यं। यद्यपि सोस्यादिति ज्ञापकरूपस्त्राचारोत्
त्रसंभवति तथापि तदपेक्षया पेष्टं व्यापकत्वं तत्तीयस्या — ज्ञ्येतेति नायमित्संज्ञकइतिसिद्धं। अ
नित्संज्ञकत्वमेव द्रढयति। अत एवेति। तस्यानित्संज्ञकत्वादेवेत्यर्थः। भाष्योक्तं वार्त्तिकार्थमाह। यं
एत इत्यादि। यत्ते इत्यतः प्राक् प्रत्याहारे व [illegible] रु स्यापत्तेः। भाष्यविरोधाच्च। उद्योत
स्त प्राचामनुसारि कौस्तुभानुरोधेनेति बोध्यं। अद्रू [illegible] च्चित्वत्रकमभिन्न [illegible] अच संज्ञाग्रा [illegible] ग्रहणादि

तदाह। अक्ष्विति। तत्फलमाह। अज्झिति। प्रत्याहार इति। निमित्तात्कर्मयोग इति तत्र सप्तमी फलं हि तत्र निमित्तं
प्रत्याहारस्य फलत्वं च तत्करणस्य। तत्सिद्धिविषये केचाधीनत्वादत एव कर्मीयमाणानामिति विशेषः। प्रत्याहारस्य
संज्ञारूपस्य समूहस्यावयवेनानुबंधेन करणकर्मणा सह समनायरूपयोगसत्वात्तदाह। प्रत्याहारार्थ इति।
उक्तहेतोरेवाह। कियंत इति। प्रत्यासन्निन्यायलब्धं शेषं पूरयति। अजिति। अच्संज्ञयेत्यर्थः। ननु इदमुपलक्षणं
वाच्यं। अन्यथाधिककिंचित्फलसंभवात् अत आह। महाविति। एतत्प्रतिपादन एव तात्पर्यं न तत्प्रतिपादने। अन्यथैतद
धिकं स्पष्टमेव तन्मते तु सकलप्रत्याहारमूल॰ मूलत्वाद्दुं शेष एव तदादेवाशकासमाधानो चित्स्येनमृजल्पा
गानो चित्यमिति तदसंगतिः स्पष्टैव। तत्र मानांतरमाह। भाष्येति। भाष्यस्य। वार्तिकस्य। अन्यथा तदुपादानं व्यर्थ
मेव स्यादिति भावः। आद्ययोरव्यापकत्वं ध्वनयितुं स्पष्टत्वात्प्रथममनुपेक्ष्य मध्यमहेतुं व्याचष्टे। तत्रेति। वार्तिक
स्य मध्यमहेतुशरीर इत्यर्थः। प्रत्याहारेष्विति। आद्यजंतेन तथाद्येष्वित्यर्थः। अन्यादृशप्राधान्यस्याभीष्टसाध
कस्य दुर्वचत्वादाह। ग्रहणेति। तदव्याचायां ग्रहसंसिद्धं नापि तु तथापाठसामर्थ्यादेवासिद्धमित्याह। हकुनेति।
तथा। ग्रहणार्थः। तेषामेवेति। अन्यासामेव ग्रहणमेवेत्यर्थः। तत्र तत्रेति विशेषः। ननूपलक्षणतोऽवश्यं वाच्ये स्युक्तं। साच
स्वरांशाद्वयंजनांशो व्याप्य वश्यं वक्तव्याहशाद्दोर्ग्रहणे दर्शितोकतेरत्वादनुसप्रोप्तिसंभवात् आपहेतुभ्यां तु वारणा

संभवः। एवं च हलंशेऽपि सोपलक्षणत्वेन गोध्योतिकात एवेत्यिग्रंथासंगतिरत आह। नन्वेतीति तत्र घटितेति। इ
घटितेत्यर्थः। यद्वोच्चारणार्थवर्णघटितो प्रत्याहारे इत्यर्थः। न च नपुनरंतरेऽलिति भाष्योक्तेस्तच्चारितार्
थ्यं। तद्व्याख्याशयस्य भावप्रकाशेऽन्यथा प्रतिपादितत्वात्। यथा पूर्वोक्तं गृहीतोऽस्यानुबंधानामसंकीर्णस्यो
५४ च्चारणोपपत्तिस्तथा हयवे सादिरूपेण तदुपनीयमधिकारोच्चारणवैयर्थ्याच्च। अत एव पुनः पुनरिति वीप्सा
ष्या ५ अभ्युपेत्याह। तद्विषयेति। तद्विषये इत्यर्थः। सहानानु मध्यमसमाधिपक्षेऽच्चारस्यानंगीकारे णोक्तहेतु
संभवोऽत आह। तद्विषयेति। तदभ्युपेत्याप्याह। चेति। तेन दोषांतरसंग्रहः। तच्चेत्संटादेरूपदिष्टत्वात्तस्य ग्रह
णं। यदि तत्रापि ग्रहणमिष्टं स्यात्तर्हि तथैव दिसत्समुपादिशेत्। हवत्यादिज्ञापनाय तथोपदेश इत्यत्र्येततत्र किं
ञ्यो रन्यतरवैयर्थ्यापत्तिस्तस्यस्थाने स्यस्पष्टत्वात्। एवं टस्यापि। नन्वान्यग्रहणं नैवेष्टमिति हेत्वसि
द्धिः। नियमार्थतया वैयर्थ्यमपि नेति वाच्यं। न स्यसर्वसवर्णग्रहणं। कञ्योरेव टणौ रेकवग्रहणं तयोः क
स्याप्यग्रहणमिति वैरूप्ये वीजाभावात्। ऐ औ जितिस्थस्यापि प्लुतत्वाद्ययार्थतया नियमार्थतापत्तेश्च।
दृष्टानुरोधेन तत्र तत्पेति वेदस्यापि वैयर्थ्येनानिष्टनियमस्वीकारापेक्षया तदभावकल्पनमेवोचितमिति॥

नातनाम्नो [illegible]त्यादि:

उपसंहरति ॥ तस्मादिति ॥ नन्वेवमुरसि सारीका जातिरत आह ॥ उरसीति ॥ दृष्टान्ते न यथा सावर्ण्यं स्यावश्यकत्वं तथा तस्येति वोनिकतुल्यत्वं तस्येति यस्तेषितं ॥ अत्र संतत्वं सर्वमे तत्र प्रत्याहारखंडने प्रसिद्धमिति ॥ नेहत्रि खितं ततरएव बोध्यं । हत्स्वेति ॥ तस्मान्नवं धहेन प्रागुक्तरीत्या वारणासंभवात् ॥ विशिष्टेन च लक्षणया शुद्ध हल्प्रतीतिरिति नदोषः ॥ नन्वतदर्थमेव सः ॥ रामइत्यादौ संयोगांतलोपप्रसंगे: ॥ असत्युपदेशावे यथ्यापत्तेरिति भावः ॥ तत्रहेतुमाह ॥ नपुनरिति ॥ चारराम पीति ॥ अ[illegible]ष्टस्पष्टोच्चारराम पीत्यर्थः ॥ नन्तुतथापि नि:संदेहायतथैवोच्चारणमास्तामत आह ॥ एषाद्येति ॥ चार्यस्य ॥ अनादिशब्दपुरुषस्य ॥ शैली ॥ समाधानप्रवृत्तिकौत्विति: ॥ एवं चान्यत्र संज्ञि विशेषसमर्पकता योपात्तत्वादत्र तस्या संज्ञित्वमेवेति भावः ॥ हलंत्यमितिसूत्र चारितमिव तारयति ॥ स्यादेतदित्यादिना ॥ नन्वष्टाध्यायीस्थस्य हलंत्यमित्यस्य हलितिसूत्रेत्यंसभित्यादिसेवार्थइति अन्योन्याश्रयसंभवएवनात आह ॥

प्र० ४

रू मा०
६०

नविभेति ॥ आदिनोपदेशे ञियस्या आदिपरघटितविधिस्त्रसांच परामर्शः ॥ तदा
हिहलमत्याहारस्यैव सिध्याऽजादिप्रत्याहारस्यासिध्याते पां वाक्यार्थबोधाभावेन
नैरर्थक्यं स्पष्टमेव ॥ आवश्यकत्वे परस्परापेक्षत्वे हेतुः ॥ नच्च व्यवहिते ॥ अन्योन्या
श्रयोऽयुक्तत्वे हेतुः ॥ कस्य चिदुक्तिं खंडयति ॥ नचेति ॥ हयवरडसादेः महलितेत स्याक्षर
समाम्नायिकस्य ॥ आद्येत्यस्यार्थमाह ॥ शेषेति ॥ तन्मध्ये इष्टानुरोधेनेष्टोद्देश्य
विधेयभावानां अंगीकारादिति भावः ॥ अपिना अपरेषां समुच्चयेन यथाश्रुतार्थ
बोधनसमुच्चयः ॥ अन्यस्यापकस्य चिदुक्तिं खंडयति ॥ नन्विति ॥ अंत्यात्पूर्वेति
वसिद्धत्वादाह ॥ अजितिं नन्वेवमाद्ये स्त्रे रादूधात्वादा वेसस्यापत्तिरत आ
ह ॥ तृतीयेति ॥ अनुनासिकेरति सूत्रे इत्यर्थः ॥ अवैतानुनासिकेहल्यइत विधानेन
तत्र साफल्यसंभवादाह ॥ अजित्यनुवर्ततीति ॥ अनुवर्ततावप्युक्तरीत्या वाक्यभे
देन तस्य विधायकत्वे ऽनुवर्त्तिव्यर्थौ तां विनापि तस्य सिद्धत्वात् ॥ प्रकारांतरेणानु
तस्याजित्यस्य विधायकत्वं तु कथमपि दुर्वचं तदेतदभिप्रेत्याह ॥ सोमध्यादिति ॥ भूसुवोरिति

श्री०

ऊ इति द्वापकानमहाव्याहृतिसूचनद्वा--रामंगलार्थं तस्याशावुपादानाच्च भूधातोर्दोषाभावात्तदा
ह॥ प्रभृतानिति॥ स्फाइसादिपेशादेर्भिन्नसामर्थ्यादित्यु अइत्यादौ तस्य तत्रानंसुलात् स्फाइसादेः शदेर्वड
पेर्श्चोइतिसापकास्याइसादेः शलास्येतिज्ञापकान्नदोषइति यद्यपि सुवचं॥ तथा--पि इसादो
दोषसत्तात्प्रभृतिग्रहणमत्र प्रकारार्थं गतस्येवोक्तिः स्वरोक्तवनिकान्यायेन॥ तत्स्वाच कथं न प्रसिद्ध
स्यस्वरस्यासिद्धिप्रसंग इति बोध्यं तु चेति भावः॥ नन्वेवमपि द्रुप्रभृतौ दोषस्तदव॥ अनंतरस्येति न्याये
नावरस्यैव तेन नियमो ऽङ्गीकारात्॥ नहि तत्र तस्य प्राप्तिरपि त्याद्येस्यात आह॥ योगेति॥ अन्य
थाऽननुनासिकद्वसेन योजनविधिनैवेष्टार्थसिद्धौ तद्दानर्थक्यं स्पष्टमेव॥ यत्स्वर्थे एवमत्रोऽपि॥ ते
न॥ तृतीयसूत्रेण॥ नन्वेवमपि अननुनासिके द्विर्वजितस्सिजेवेति विपरीतनियमः कुतो न ता
वतापि तृतीयसूत्रस्य सार्थक्यलाभात्॥ एवं च द्रुप्रभृतौ दोषस्तदवात आह॥ सिद्धेति॥ ग्रहणाननुनासि
कानां तथा सति लाभावेनैव भिन्नो ऽसंभवादिति भावः॥ प्रकृतिमाह॥ एवं चेति॥ एवमर्थकसूत्र
त्रयकरणेऽपि सथः॥ अपि नाम गुरु गुरु स्वत्तदृशसूत्रायेति परिग्रहः॥ त्वेन॥ तं त्वा द्वसादिपरिग्रहः॥
एवं च संप्रसारणं सत्त्वापत्तिः स्यात्॥ वेस्या॥ अपाणिनीयत्वस्य॥ ते--सिद्धिं परिहरति॥ सूत्रेइति॥
उपाचरति॥ कथयंति॥ तदेवा॥ तेरर्थं क्रमेव॥ प्रयोगा॥ तदपेक्षया ऽधिकं तद्विशिष्टं वा॥ परसंदर्स॥

२२

संक्षिप्तं कृत्वा ॥ ननु तावतापि सूत्रभेदोऽस्येव स्तुतः वात आह ॥ नासाविति ॥ ननु कथं स न दोषाय ततो
ज्ञायमानस्य केवलादृष्टस्येतो ऽसिद्धेर्वं च [illegible] तदावश्यकत्वमत आह ॥ सतीति ॥ एवं च यदि शुद्धाद
ष्टार्थसंभवेत्तदा भवदुक्तं स्यात्तदेव नादृष्टं तु कल्प्यमानं पुन्यासोऽदेवं [illegible] नततइति तथादेवं च
मिति भावः ॥ सभिसंभवेऽदृष्टमनेन प्रसाख्यानस्य सत्वे शुद्धादृष्टार्थसम्भवोऽति सूचितं ॥ तदाश
यः ॥ नासौ सूत्रभेद इति वदतो भगवत आशयः ॥ अतएव ॥ तत्र तेषां तद्वारैव तदर्थवा
देव ॥ ननु नमाचापद गौरवमत आह ॥ नहीति ॥ अस्यास्तीत्यत्रान्वयः ॥ वृत्तिभिमुखी दाह ॥
वरागो भीति ॥ नारायणादिसिद्धान्त मतं खंडयति ॥ नचेति ॥ सोऽति ॥ युगपदित्यर्थः ॥ आद्यो
ऽर्थमाह ॥ समभिति ॥ एतीयस्यापि मेवो हेगछतीति ॥ कश्चित्तथैव पाठः ॥ वृद्धि विषयाभि
भावः ॥ एवं योगार्थमुक्त्वा रूढ्यर्थमाह ॥ मध्येति ॥ आद्यंतसमभिव्याहारात्स्य लाभः
२२ स्वरूपमित्यनुसाऽऽदैः संज्ञा ॥ वृद्धिगुणादिसंज्ञास्विव सामानाधिकरण्यात् संज्ञावाच
गतिः ॥ तथा च मध्यमो वर्णो अंत्येन सहितमादिरणादि संज्ञको भवेतीत्यर्थः ॥ न
हि नेति ॥ रूपसिद्धिरस्तु आए तेय [illegible] परोऽत्र पररूपं कृत्वा ओमाङो श्चेति पररूपकरणे
टमः

नबोध्या। एतद्रूपसिद्ध्यर्थमेवाङः प्रश्लेष इति बोध्यं। नान्योन्येति। नान्योन्याश्रयशंकापीत्यर्थः॥ त
वं सतीत्वस्य तत्रानिर्देशा दिति भावः॥ [illegible] शंकाया अज्ञानतः संभवादिह। तमरीति। आदिनोप
पतथोत्क्यादि परिग्रहः॥ कटीवी सत्रेति। कटी सत्रवी सेत्र चेति भावः॥ इङ् अध्ययने इकू स्मरणे
अनयोर्निस्यमधिपूर्वकत्वा दनुहेरवः॥ सहाङ् पूर्वादिति। अनेन केवलादाङः पूर्वोच्चत
वा ५ त्संज्ञाबोधितात्। तजिति। ताछीत्यादेरभावस्त्र नस्त्वेप्रसंगलवेतिभावः। बोधेनोदिति।
ततेननवीनास्तु इत्यास्यनास्तीत्याहुरित्यं ते नैतन्मूले लखनागंतरलेन। एवं सतिद्विध्या
सहैतेति रूपापत्तेः। वेत्तलतत्तलसहआयतीति सहेताइष्टकिटकटी सत्रे प्रक्रिष्ट स्यभविष्यती
त्यादिरं स्येनेस त्रू कौ स्तले नेद प्रयमानः [illegible] कात्वितकः पदात्तः। एवं योगरूढि [illegible] पक्षेदोषे
को शुद्ध योगपक्षे तत्ता धारणं दोषमाह। किं वेति। यत इति दोषः। सर्वत्रापि एवं। आङो रूपसाधनार्थ
मावश्यकत्वादाह। अंसिमंतादिसस्येति। इदम [illegible] त्येयन्वयति। उपपादनमध्य इति शेषः। मचेजे एरधातुपक्षेदु

ह॰२

त॰५

गे॰२

रू॰ वी॰ आ॰

१२

पासिद्धिसमुच्चयः। नन्वमूतात्प्रत्ययनार्थेनरथान्तरादिवद्युत्पादनं साधुत्वार्थमत आह। कृतेत्यादि। कुत्कृ
दौ त्यस्यार्थः। क्रोशादित्वात्सर्वग्राहकाभावादिति भावः। अतः प्रकारान्तरस्यासंभावात्। तं। अन्योन्याश्रयं। संदूरू
स्वरूपात्यत्ति भगवतोऽप्यभिमतेत्याह। भाष्येष्वेति। वक्तृप्राप्यमिति। इति। अस्यां सेरेव संबंधः। कैयटीयव्याख्यानस्य दुष्ट
त्वादाह। तस्येति। अंत्यशब्दस्येत्यस्यमध्यमणिन्यायेनान्वयः। कर्मधारयेत्त सप्तादस्यैतदैनिपातापत्तिः। आद्ये प्रथ
मानुपपत्तिश्च। यच्चाकथंचिद्रूपपादनापि तद्यात् न्यत्रकृतगतिरेवोचितेति भावः। एवं च। तत्वात्
न्वये च। यच्च पाणं [illegible] नाभिमतिन्यायेन तस्यौ [illegible] सेरेव निवेशस्तथापि श्रौतक्रमादिति न्या
येन तस्यावश्यकत्वमित्याह। हलन्तत्वान्तमिति। ननु द्वितीयवाक्यार्थे च व्यनुपपत्तिरत
त आह। अंसेति। नन्वेवमप्याख्यातत्वाभावेन कथं संमतिदानमत आह। अत्रोच्येति। आद्यसेति।
एवं तत्तु ज्ञानाभावेन क्रमिकबोधस्यैव वाच्यतया [illegible] द्रावश्यकत्वात्। एवं च कण्ठतस्त
थानोक्तमपि तदभिमतमेव। अत्रपक्षे पदद्वयावृत्तेरुक्तरीत्याऽवश्यकत्वेन पुनर्व्याख्यानेन यत्केशां
से इत्युत्तमसहमानो मूलकृत्कदाचिन्मेव संपूर्णसूत्रस्य दर्शितवान्। नन्वेवं भाष्यव्याख्यानेऽस
वीर्यत्रिज्ञानमस्तदेव न केवटेनान्यथाव्याख्यानात्तत्वादत आह। हसमीप इति। हस्य अन्त हलन्त इति
समास इति भावः। व्याख्यायांमिति। भगवदभिमतायामित्यर्थः। समासानुपपत्त्यादिदोषोऽत
र मन्यत्रस्य [illegible] त्यादाह। इत्यत्रामिति। एवमपि। उक्तान्योन्याश्रयपरिहारेऽपि। इतिविभ

शिव॰

१२

त्वीति। इति सूत्रघटकविभक्त्यर्थः। सुबादिसिद्धस्तदधीनत्वात्। वाक्यार्थबोधायवतस्यावश्यक
त्वमिति भावः। तद्बोधश्च। हलंत्यमितिवाक्यार्थबोधश्च। पवादेति। नविमेतिनिषेध्येत्यर्थः। न
न्वपवादवाक्यार्थज्ञानमेव प्रतिबंधकमतआह। प्रतीति। वाक्यार्थेति। तज्ज्ञानेत्यर्थः। नन्वेवमपवादबो
धात्पूर्वमुत्सर्गवाक्यस्य लक्ष्यसंस्कारकत्वापत्तौ उदासीनविषये इवापवादविषयेपि प्रवृत्त्यापत्तौ
पश्चादुत्कृष्टं तं प्रति ब्रूयात् मान्गु ... डः पा इति तेन किंकृतस्यादिति स्थानेंतरतम इति सूत्रभाष्यो
क्तन्यायविरोधितापवाद [illegible] शास्त्रवैयर्थ्यापत्तेः लकेन प्रातिपदिकार्थसूत्रभाष्यपठिते त्रि६
नपूर्वं ह्यपवादानभिनिविष्टं तेपश्चादुत्सर्गाइति न्यायेनोत्सर्गवाक्यार्थबोधात्पूर्वमपवा
दवाक्यार्थबोधस्यावश्यकत्वे वचनेन प्रागुक्तरीत्या सुसिद्धत्वे निष्फलत्वभावेनान्योन्याश्रयस्य
वस्थत्वात्तत्राह। एवं ह्येति। इयं लक्षणैकचक्षुष्काणामेतत्पाक्षेयेनाह। लक्षणैकेति। ... अस्य बुद्धि
पर्यालोचनेन निर्णयसंस्कारेत्यन्वयः। प्रागुक्तरीत्योत्सर्गवाक्यार्थबोधस्य जातत्वेनापवादवा
क्यार्थबोधात्पूर्वमिति शेषः। उद्देश्यतेति। उत्सर्गशास्त्रीयेत्यादिः। सर्वत्र। उदासीनविषयेऽपवा
दविषये च। विषयेति। लक्ष्यभेदेत्यर्थः। नापत्त्या। अनुपपत्त्या। क्वचित्तथैव पाठः। ननु तदा तस्यै
व वैयर्थ्यमिति तदनुपपत्तिदोषेण युक्तोऽतस्तदेवाह। युक्तेति। वाक्यस्यैवापवादशास्त्रस्य वै
यर्थ्यापत्त्या चापवादशास्त्रपर्यालोचनेनेति पाठः। शास्त्रेति। तद्वाक्यार्थबोधानिश्चयेनेत्यर्थः।
८२ अत्रास्यैव बोधस्य लक्ष्यसंस्कारकत्वादाह। तद्विषयेति। तदविषयं। अपवादशास्त्राविषयं। निषे
ध्येन महावाक्यार्थबोधनेनवा तस्य त ... त्वनिर्णयादिति भावः। अयमपि बोधोऽनेन लक्ष्यसंस्कार

कइत्याह। तत्त्वादीति। तत्तदर्थविभागइतिवदिदं साधु। एवं सर्वत्र बोध्यं। अयं च्चारम्भेतोपप्लवोऽ
पवादवाक्यस्थलेऽपि बोध्यः सति संभवे। संस्करोतीति। प्रत्यासत्त्यात्र लक्षणैकचक्षुष्क एव कर्त्ता
अतएव तत्कोपपत्तिरिति भावः। ननु वैयर्थ्यापत्त्या विप्रतिपत्तिरत आह। अन्यथेति। तथांगीका
रे वैयर्थ्यापत्त्यानुकूलशीलनं गीकारे इत्यर्थः। विकल्पेति। शास्त्रत्वाविशेषात्सर्वत्रापि वैयर्थ्य
स्य दुर्वचतया शास्त्रद्वयप्रामाण्यादिति भावः। निवर्त्तेरिति। स्वीकारादिति शे[illegible]षः। तत्रापि।
लुगादिविषयेऽपि। एवं च प्रागुक्तरीत्या तदन्यविषयत्वात् तस्येति न व्यभिचारस्तदाह। नहि
बद्दति। अभ्युपेत्याप्याह। न्यायेति। प्रागुक्तरीत्येति भावः। ध्वनितं वेदमर्थवत्सूत्रे भाष्ये तत्रै
वोद्योतितरिति स्पष्टं। [illegible] ननु नायं परिभाषार्थः अभिनिविष्टांते इत्युक्त्या टटदोतद्ध्यात
प्रवृत्तिरित्यस्यैव तत्तोलाभादत आह। अभीति। एवं च हि यतः उक्तहेतोः। पूर्वमपवादात्प्र
पवादशास्त्राणि। [illegible] अनेन परिभाषाज्ञापकमपि सूचितं। एवं च सर्वथानवकाशेवि लु०
षयोऽयं। अभिनिविष्टांते। बुध्यास्थानभवंति। पश्चादुत्सर्गाः। लक्ष्यं संस्कुर्वंतीति परि
भाषार्थो बोध्यः। एतेनोक्तान्योन्याश्रयपरिहारः। नापवादसिद्धप्रयोगन्यविषय एवाप
क४ वादबोध्यात्पूर्वमुत्सर्गस्य न लक्ष्यसंस्कारैषा। अपवादसिद्धप्रयोगेनिनितु तद्बोध्यात्पूर्वम
पिसेत्यवश्यं वाच्यम्। नविभक्तावित्याद्यपवादारंभसामर्थ्यादित्यपास्तं। उक्तयुक्तेः। द्वि शिव०
तीयमते दोष एव नेति हृदये तो वै लक्षणं प्रतिपादयन्मतांतरमाह। लक्ष्यैकेति। तच्चा १२
स्त्रेति। अपवादशास्त्रे इत्यर्थः। [illegible] नुपयोगात्। वस्तुतोऽपवादस्थला

शयावीप्सा। यापवादाश्च यावा। अंसेठ उत्सर्गेणि तस्योत्सर्गेवाव च्छिन्नेने त्यर्थः। एवमपवादेष्वत्रापि। न
तु लक्ष्यैकचक्षुष्कस्य लक्षणापेक्षेवं नेति कथं तेन तत्संस्कारोऽत आह। तस्यापीति। लक्ष्यैकचक्षुष्कस्या
पीत्यर्थः। अपिशब्दः समुच्चायकः। एवेन तदन्यव्यावर्त्यमीमांसानिरासः। स्पष्टं चेदं सर्वं पदेशाधिके। इदम
पितत्रगमकमिति भावः। वा। अपवा। विषयमित्यध्येतत्तद्वृत्तिविशेषः। अपवादशास्त्रपर्यालोचनयाप्या
गपीति तदर्थः। अमिनि विशां तद्वृत्तस्य तद्वृत्तकस्यार्थमाह। प्रवर्त्तत इति। अपवादविषयं • प्रकल्प्य
(बुध्वा रूढं कृत्वा। ततः। तदनंतरं। उत्सर्गः प्रवर्त्तत इत्यर्थः। अंगीकारे तु पूर्वत्तो भेदो न स्यादिष्टापत्तौ
वाग्रहणासंगतिरत आह। पूरीति। अत एव प्रसंगादेतदपीति प्रायां कैयटो क्लिं खंडयति। यस्त्वि
ति। अर्थः प्रयोजनं तदाह। यपेति। —— संप्रसारणमिति। प्रवर्त्तत इति शेषः। एवमग्रेपि। अ
भ्यस्ते। उभे अभ्यस्तमिति सूत्रे इत्यर्थः। एतदेव। न संप्रसारणे इति सूत्रमेव। न पूर्वस्येति। आदा
विति शेषः। तेन न पूर्वं पूर्वस्य मत विप्रतीत्यर्थः। पश्चात्रासंतु तेन निषिध्यते। लक्ष्यभेदान्न लक्ष्ये लक्ष
णस्येति न्यायसंचार इति भावः। लक्षणया निर्वाहे ज्ञापकत्वं नेत्याशयेनाह। यद्वेति। प्रथ —
मांतसंप्रसारणपदस्य तदाश्रयेत्लक्षणया संप्रसारणनिषेधाभावेन युगपदुभयत्र संप्रसारणे सूं
पूर्वत्र तदाश्रयपररूपनिषेधे यणो • सिद्धिरिति भावः। पूर्वस्येव प्रथम म प्रकृत्रिरित्यपि पदाकी
हा। आदीति। सप्तम्यंत संप्रसारपदस्य लक्षणया तदाश्रये यणि परतः पूर्वस्य तन्निषेधः पूर्वत्र • व
कुत्रीहिरत्र • षष्ठीत्सपुरुष इति भावः। विरोधमुपपादयति। नहीति। न्यायेनोक्ते त्वादिः। एवमग्रेपि।
मद्युक्त एवेति। अत एव ततः इत्याद्यक्षरानुगुण्यमपीति भावः। तदर्थ इति। उक्तवचन ह्यार्थ इत्यर्थः।

वार्त्तिके
आत्मयस्ये
तिसंबंध
सा। मान्ये
षष्ठी२

उक्तयुक्तेरिति। आकांक्षादिसत्त्वे पदपदार्थयोरुपस्थितेस्तद्बोधे प्रतिबंधकाभावादित्यर्थः। अभिनिविष्टस्यो-
पवादविषयं तत्सदृशादिपदस्वारस्यभंगापत्तेः परिभाषाद्वयवैयर्थ्यापत्तिश्चे● त्यपि बोध्यं। नन्वेव
मन्यत्रोत्सर्गापवादस्थले निर्वाहः स्थलेपि प्रकृते प्रथमपक्षे द्वितीयपक्षे वान्योन्याश्रयदोषाभावेपि प्र
थमपक्षे परिभाषाविरोधस्तदवस्थस्तत्र तदविषयत्वनिश्चयार्थं तद्विषयलक्ष्यसंस्कारनिर्णया
र्थमपवादशास्त्रपर्यालोचनावश्यकत्वस्य प्रागुक्तत्वेनात्रोत्सर्गकृतलक्ष्यसंस्कारबुद्धिं तत्पर्यालोच
नासंभवेनापवादवाक्यार्थज्ञानोत्तरमुत्सर्गकृतलक्ष्यसंस्कार इति परिभाषायां संभवादतआ
ह। नविभक्ताविति। एतच्छास्त्र● घटकोद्देश्यविशेषणत्वपदार्थविशेषज्ञानेत्यर्थः। मात्रपदे
नवाक्यार्थबोधव्यावृत्तिः। तदानीमितरसकलकारणसत्त्वेपि विभक्तिपदार्थज्ञानादिदं संभ
वतीति भावः। पादीनां। लुवादिप्रत्याहारघटकानां। एतदिति। नविभक्ताविति सूत्र्यर्थः। बुध्यानि
श्चयेन। ते●षु। पादिषु। एवं चनापवादवाक्यार्थज्ञानं पूर्वमपेक्षितं सर्वत्रेति नान्योन्याश्र
यः। नन्वेवं प्रागुक्तग्रन्थविरोध इति वाच्यं। अपवादशास्त्रघटकसंभा●वितपदार्थविशेषज्ञा
नमात्रेण लक्ष्यसंस्का●रः साधुत्वं यस्मात् तं लक्ष्यसंस्कारजनकं तद्विषयमिति पूर्वं ग्रन्था
र्थात्। अत्र संभावितस्थले प्रकृते रजत्वैव मंगीकारे ऽन्यत्रापवादे संभावितस्थले तथैवांगीका
रात्। एतेनोपदेशेऽइदं सं। अच्। अनुनासिक इत्यस्यापि पूर्वं हीलस्यावतरणोक्तरीत्यात
त्परकाले ऽचू पदार्थनि●सभावे नान्योन्याश्रयस्तदवस्थः। नचैतेनेत्यादि सामर्थ्यादित्संत प्रागु
क्त्वान दोषः। विभिन्नविभक्तिनिर्देशेन योगविभागेन वा विषयनियमस्य सर्वनियामकत्वे

नापवादत्वनिर्णयादित्यपास्तम् नचैवमपीतः प्राक्तुप्रत्याहारासिद्ध्या कथमादेसमासएवे
तिवाच्यम् वर्णोपदेशकालेजादिसंज्ञानामनिष्पादादिति कैयटविडककौस्तुभायुक्तरीत्याति
वीह्मातदाह दिगिति सूत्रे इत्यस्यनिर्मूलत्वंनिराचष्टे अत्राप्युपेति आवृत्तेहलन्त्यमिति सूत्रेपीत्य
र्थः अपिर्द्वितीयसूत्रसमुच्चायकः मूलाशयवर्णनमिदंतद्रीत्या नतुसिद्धान्तइतिबोध्यं मूलम
नेकरणेचञोऽभावादाह नहलेति आद्योच्चारणविषयेहलीत्संज्ञानहिविषयतायास्तत्रैव सत्वेन
तल्लाभात् अतएव तदर्थमाहेति नोक्तम् स्वमतेतदन्तसूत्रैरेवासत्वादितिभावः आदिरिति कि
मिति तदभावेप्यन्त्यपदेनाद्येपात्तलाभः नचैवमपिशाह्यन्वयप्रतियोगित्वानापत्तिस्तथाचुप
स्थितेरितिवाच्यम् आवृत्तिवैचित्र्येणक्वचित्तदंगीकारात् एवंचस्वस्यचेत्यनेनपरामर्शोपिसूप
पादः एतेनसंज्ञासमर्पणार्थमादिग्रहणमितिरत्नाकरोक्तमपास्तमिति प्रश्नः अन्त्येति अन्त्यत्व
स्यपूर्वनिरूपितत्वेनादित्वानिरूपितत्वात् सर्वेषामेवाद्येयोनादेरिति यदन्त्यसहितःपूर्वः प्रत्या

चि॰ मा॰ २८

सस्या पूर्वेषां संज्ञेत्यर्थलाभेनैणादाविकारादेरिव तत्सहितपूर्वत्वेनाकारादेरपि ततः पू
र्वत्वेन तत्संज्ञित्वापत्तौ ग्रहणापत्तिरिति भावः एतेनादिना नियमेनान्त्यस्यैवाद्वेपमानाभा
वेन मध्यमस्याप्याद्वेपमध्यमेनासहितत्वादिस्ततः परेषामपि संज्ञा स्यात् एवमन्त्ये
नेतासहितो मध्यमस्ततः पूर्वेषामपि संज्ञा स्यादिति तयोर्ग्रहणमिति कौस्तुभोक्तं त
त्त्वत्राप्याद्यवर्णेन मात्र आदिरिनासहित इत्युक्तेऽपि संदंशपतितन्यायेन मध्यस्थानामेव सं
ज्ञित्वावगतेस्तदधिकस्योपस्थापकाभावादिति तत्तं वङ्करत्नाकरोक्तं चापास्तम् उक्तयु
क्तेः उक्तौ सर्वौ रीति मन्यत्रातिदिशति एवमिति इणः परणकारेणैव सञ्ज्ञस्य वक्ष्यमाणत्वा
दाहृज्ञादीनामिति एतेनान्त्येनेति किं स्तुट्प्रत्याहारस्थटकारेणमाभूदिति हृस्तुक्तं यद्यपि
टांतसंघस्य टाटकारेणान्त्य एव तथापि अवसितान्यत्वविरहः इहलान्यत्व प्रयुक्तेस्तत्संज्ञाय
स्यतेन प्रत्याहारेऽन्त्यग्रहणसामर्थ्यात् नहि टाटकारे हलन्त्यमिति प्रवर्तते इति स्तुट

नपुंसकेति सूत्रे हरदत्तोक्तम् अत्र तथा दराज्युक्तं टाटकारस्य टाङसिङसामित्यादौ विशे
षणार्थत्वेनापूर्वविधित्वादौ इष्टस्यानन्यार्थतया प्रत्यासत्तेश्चाप्तेनैव प्रत्याहारसिद्धावन्येनेति
व्यर्थमिति कौस्तुभरत्नाकरायुक्तं चापास्तम् उक्तयुक्तेः प्रत्यासत्तिन्यायाद्बाधिन्यायस्य प्राब
ल्याच्च ननु भवोपादाने ष्युक्तरीत्या दोष एवात आह भयोपादानेत्विति एतद्द्येन दोषो लोके
इतिपाठः अत एव पंचस्य क्तहेतुकेत्यादेरसंगतिः प्रतीतिर्लक्षणावश्यकत्वे हेतुः सो
न्य इति लक्षणास्यावश्यकत्वे इतिपाठः सतीति तस्य शेषः आकारादीति इगिणादिना इति
भावः आदिनाजादिपरिग्रहः अत एवाहणकारेति अनापत्तेः अप्राप्तेरुक्तलक्षणेनाक्रान्तत्वा
त् नन्वेवमपि कथं संज्ञिलाभः नच मनोरमायामुक्तत्वाद्दोषोक्तिर्न युक्ता प्रतिज्ञाभंगापत्तेरिति
वाच्यम् तद्युक्तत्वेन विलक्षणायुक्तेरवाच्यत्वादत आहात्रेति प्रकृतसूत्रे इत्यर्थः आक्षेप
वीजमाहावयवेति स्वेति आद्यंत्येत्यर्थः एतेन संज्ञास्वरूपान्तर्भूतयोराद्यन्त्ययोः स्वघ

टितसमुदायाक्षेपकत्वेपि तदन्तर्भूतयोस्तयोः संज्ञायाः पारार्थ्यानियमात्त्वाच्च टितसमु
दायस्यैवाक्षेपइतिमंदोक्तमपास्तम् तावतापितस्यतदनुपादकत्वात्तृतीयोचित्याच्चे
तिदिक् तस्यच उक्तसमुदायस्यच युगपदितिशेषः लक्ष्येति एतेन वर्णसमाम्नाये।
तथात्वात्तदिदमयुक्तमित्यपास्तम् सिद्धानुशासकत्वाच्छास्त्रस्य कार्यार्थसंज्ञायास्त
त्राफलत्वाच्च प्रत्येकमिति आनर्थक्यात्तदंगेष्विति न्यायादितिभावः संज्ञित्वमात्रेवाधकाभा
वादाह नतत्कार्यमिति नसंज्ञित्वप्रयुक्तकार्यमित्यर्थः आचारादप्रधानत्वादित्यनयोरसार्व
त्रिकत्वादाह तस्येदिति नन्वेवंभाष्यादिविरोधोतआह। तदिति एवेनानुवृत्तिनिरासः मूले
कौमुद्यां कैयटदीक्षितरत्नाकरदशमाद्युक्तिं खंडयति स्वमित्यनुवृत्तीति स्वरूपमित्यनुवृत्ति
भावः फलाभावादिति मध्यमानुवंधातांतत्वावधारणायोक्तप्रकारस्यावश्यकत्वेननैव
तद्धारणे एतन्मात्रवारक तदनुवृत्तौफलाभावादित्यर्थः अतएव एतत्सूत्रप्रत्याख्यानसंगतिः

अधिकं शब्दरत्ने भावप्रकाशे च स्पष्टं तत एव बोध्यम् इत्येके इति अस्य चतुर्दशसूत्र्येकवा
क्यतया तत्तत्सूत्रान्यस्य ग्रहणेन तस्य चेत्त्वस्यैव सत्त्वादिति प्रश्नः यत्र प्रत्याहारो यथा स्यादिति ।
इत्येनीति कौस्तुभरत्नाकरदण्डादयस्तत्तस्याविडितत्वादत आह नमेति इणादिरित्यादिः तरे
कवाक्यत्वेपि तत्तत्सूत्रान्यस्यैव ग्रहणे मानाभावेन विवक्षितसमुदायान्यत्वस्य नमङ्गणति
णादावपि सत्त्वम् परस्मिन्सतीति आदिलक्षणमपि विवक्षानिबन्धनमत एव गादिप्रत्याहार
सिद्धिः अन्यथान्यवर्णादेरपि तत्तत्सूत्रादेरेव ग्रहणेन तदसिद्धिस्स्पष्टैव न चैवं सिद्धान्तेस्त्विति
प्रत्याहारस्फोटकारेण कुतोत प्रत्यासत्तेर्न्याय्यत्वाद्यस्य प्राबल्येन तस्य तत्र विशेषणार्थं तया पूर्वा
न्तत्वाभावेपि तदापत्तेरिति वाच्यं मिथः समभिव्याहारादन्यपदे स्वविनत्वप्रतिज्ञया वान्य
त्वप्रयुक्तेत संज्ञावनैव तदङ्गीकारादिति भावः नन्वत्रान्यस्यैतत्संज्ञादिना पहारादादेरेव संज्ञा
त्वमिति कैयटखण्डनाय कौस्तुभेऽउक्तत्वेन तत एव विभक्तिः स्यात्तु समुदायादिति इकाइत्यादि

निर्देशानुपपत्तेः चोवाक्यालंकारे त्वर्थे वा सूत्रेषु वर्णसमाम्नायस्थेषु इगादीति इको य
णित्यादिष्वेष्विति भावः नन्वेवं प्रत्याहारसिद्धिरेव न स्यादत आहान्त्येनेत्येति तस्याक्षा
र्थलक्षणायामित्यदं तात्पर्यमाह कामिति भावः एवमादिशब्देऽपि तत्सदृशे लक्षणा
वोध्या तदध्वनयन्नाह अक्षीति एतेनादित्वान्त्यत्वयोरत्र स्वतः सत्वेन तल्लक्षणेनाचि
ता इतेत्यस्य वत्सरोचितेत्यपास्तं ननु प्रत्यभिज्ञया एकस्यैव लाभेन किमर्थं सदृशे लक्ष
णानत्राह सादृश्येपति चात्रव्यक्तिपक्षे तत्त्वेति अभेद इत्यर्थः आङ्गरिति सूचितमाह चिवीज
तज्जातिपक्षे सिद्धान्ते लक्षणानुपयोगः इगादिशब्देषु तदभावेऽपि ज्ञानैरैक्यात् तत्रास्य सत्त्वादि
ति नन्विणादिप्रत्याहारेषु ऋकारादीनां ग्रहणं मा भूदिति वाच्येऽजादीनामिति किमित्युक्तम
तत्राहाचीति येरणेवति एणेनेति शेषः यत्तु सूत्रमनेव वर्णवद्धल्पदार्थः प्रसिद्ध एव युक्त
चैतन्न अन्यथा व्याकरणज्ञानविकलानां तज्ज्ञानं न स्यात् यणादयस्तु शास्त्रमात्रोपयुक्ता

इति तेषां तद्बोधेच्छापत्तिः भाष्येऽन्योन्याश्रयशंकासमाधानादिसर्वशास्त्रसिद्धस्यैव शास्त्र
ग्रहणमित्यभिमानेन लश्चेति वक्तव्यमित्यस्याप्ययंभावो हलन्त्यं ल् इति न्यासः कार्य उपदे
शेऽन्त्यं हल् चेद्भवतीति तदर्थः तत्रान्त्यवाक्ये तल्लस्य त्वलोपसंभवः एवं च संयोगान्तलोपोऽड्
र्लिभ इति मनोरमादिचिन्त्यमिति यद्वा मास्तु प्रश्लेषः सूत्रशाटकन्यायेन न्यासः भाष्ये तूक्तम
पीदं तुल्यन्यायत्वादिहाश्रितमिति मंदस्तन्त्रपाणिनेः पूर्वं तज्ज्ञानेऽपि तदाशयेन प्रयोगाभाव
स्य शास्त्रे प्रतिपादितत्वात् वार्त्तिकृद्भाष्यकृदादीनामपि तज्ज्ञानस्य तदुक्तरीत्या संभवेनाभि
मानेन प्रवृत्तेर्वीजाभावाच्च तद्विकलपदेनान्यशास्त्राध्ययनशीलानामेव ग्रहणे तेषां तद
बोधेच्छापत्तेश्च अगोपालादितदन्यग्रहणे तेषामबोधस्यैवोपलंभाच्च अन्यत्रेत्संज्ञार्थकृत
ल प्रश्लेषेण स्वस्य तत्त्वफलाभावाच्च लुप्तनिर्दिष्ट इत्युक्तेश्च स्वस्मिन्नपि प्रवृत्तौ स्वस्यासत्त्वेन
प्राप्त्यलाभाच्च पूर्वत्रासिद्धमितिवत् सूत्रशाटकन्यायस्य वाक्यापरिसमाप्तिन्यायविरोधेना

चि॰
१८

ज्ञापके श्रेतिदिक् समासेनान्त्येति कर्मधारय इत्यर्थः तस्य यौगिकत्वेन विशेषणत्वादि
तिभावः नन्वन्त्यकरणमनित्यमत आह कर्मेति भवतीति तथा चातिप्रसंगः अन्त्यग्रह
णत्वादिग्राहकस्यासफलमितिभावः अत एव मूलरीत्यहान्त्यपदोपदेशपदे ति उपा
त्तान्तु हतिाभ्यामित्यर्थः सिद्धान्ते तु अन्त्यग्रहणसामर्थ्यादेव तदर्थलाभ इति नोपदेश
पदानुवृत्तिः एतदर्थमेव प्रत्यासत्त्येत्युक्तम् यः प्रत्ययादिज्ञापकान्तादेरिति तत्तद्याह
त्यर्थसत्त्वग्रहणमिति स्पष्टं भाष्यादौ उपदेशग्रहणस्य बहुव्रीहिणा कालपरत्वादेत्याह
प्रत्यासत्त्येति इह हलन्त्यमित्यत्र तत्वन्यत्रान्त एवादिरन्त्येनेत्यत्रेत्यदसार्थकं अत्र मतान्तरम
पिधनयितुमाहात एवेति नाहश समुदायान्त्यग्रहणादेवेत्यर्थः इत्संज्ञायाः परिज्ञाणमि
ति पंचमीसमासः ह्रस्वपत्नीतिवोध्यः अन्यथोकारे इत्संज्ञया लभ्येत तत्वात तत्रास्याकारवे
यर्थ्यं स्पष्टमेव नन्वेवमपि तद्विषयत्वस्य समुदायवदवयवेपि सत्वेन प्रत्यासत्त्या समुदा

याल्पग्रहणमेवकृतोतआह सप्तदेति नात्तरीयकत्वेपेति उच्चारणेपीतिशेषः तेषा
मवयवोच्चारणानां तन्तूपदेशशास्त्रस्यवङ्क्षीहिणान्यथावाकालपरत्वेपि तद्रूपाथार
स्यकर्तृत्वयहाराप्रधानक्रियान्वयस्यन्याय्यत्वेनाद्योच्चारणकाले इत्संज्ञाभवनमित्यर्थः
लाभः सचबाधितः तत्कालात्पूर्वमनभिव्यक्तत्वात्तत्काले इत्संज्ञायाउर्वचत्वात् तत्कालेभि
व्यक्तोत्तरत्तदनन्तरकालेसोचिता अतएवनालाविति सूत्रभाष्यसंगतिः किंच इडणितिण
दाविदमपिदुर्वचमतआह तत्रविद्यमानमन्त्यमिति आद्योच्चारणकाले विद्यमानंतदाहशम
न्त्यहलित्यर्थः एतेनसमस्तपपत्यर्थं विद्यमानमित्यस्याध्याहारइत्यपास्तम् तदुक्तंफ
लमाह तेनेत्यादिना तदध्याहारेणेत्यर्थः तथाच यत्रयदेत्संज्ञाशास्त्रप्राप्तिस्तदातत्रसेति तदर्थ
कोपदेशपदेनतदव्यवहितोत्तरकालोलक्षणीयइतिसर्वत्रतत्सिद्धिस्तदाह इडणित्यादा
विति णादीनामितिलभिन्नानामितिशेषः तस्यतुसूत्रान्तरेणोपदेशाव्यवहितकालएवसा

तदाह हलिति तत इत्संज्ञानाज्झलाविति सूत्रभाष्ये तुलास्यप्रयत्नविषयमित्याहास्यत्रेति
लास्यप्रयत्नादिभिन्नेत्यर्थः अत एव वैलक्षण्यबोधकस्तुशब्दः तत्र भाष्ये तु ऋके हेतुमाहात्वमिति
जसः शीत्यादावसंभवादाह प्रायइति उच्चैस्त्वस्याच्चेत्यादि अभीतिज्ञातस्य संज्ञाविधानादि
तिभावः तदव्यवेति पदपर्यालोचनकाल इतिभावः यथोद्देशपक्षे चेदमत एवाह प
दार्थबोधेति अनुवन्ध्यविनिर्मुक्तस्यैव पदार्थस्योपस्थितिरित्यर्थः गुरुकुलवत्समासः
सूत्रभाष्यादिति उत्तरतस्याव्यवहितत्वमर्भस्यैव विवक्षणादितिभावः नन्वेवं तस्य लोपे
न तत्स्वरूपत्याज्ञप्तिरुपस्थितिति वर्चेति तस्यार्थवत्वान्न तो विभक्तिरुचिता अनुवन्धस्तु तदग्रे
वाच्यो तत्राह युडिति सूत्रेश इत्यर्थः तत्र संज्ञायामपि लोपोनोच्चारणसामर्थ्यात्तु अ
न्यथा तत्स्वरूपप्रतिपत्तिरेव न स्यादितिभावः तदाह तेनैवेति सानुवंधेनैवेत्यर्थः ए
वमग्रेपि नन्वेवं तत्रेत्संज्ञापि न स्यान्नत्राफलत्वादत आहेत्संज्ञेति तस्याः कार्यमित्य

र्थः कैयटे इति तत्र हि तितनीति वार्त्तिकप्रत्युदाहरणेऽपि किरतीति प्रतीके इत्संज्ञासूत्रेण
ते एव प्रवर्तन्ते उपदेशोत्तरकाले तद्विधानात् लोपहाराच्च तस्यासत्त्वप्रत्यायौ प्रतिपाद्यते
पदार्थौ पस्थिते रत्त्वं वयविनिर्दिष्टक्रियाया एव जायमानत्वात् ततश्च हि रेफो मम इति वक्तुं द्या
र्थयोरभेदोपचारात् संज्ञी संज्ञाधर्मेण कथ्यत इत्युक्तं नन्वेवं व्याकरणस्य विकार इत्यर्थे अ
न्तोदात्तादेशोऽत्यजिआद्युदात्तं वैयाकरणशब्दे चित इत्यन्तोदात्तत्वापत्तिः व्याकरणशब्दस्त
लित्स्वरेणाद्युदात्तः करणशब्दस्याङ्समासे समासान्तोदात्तबाधक तत्पुरुषे तुल्यार्थेति ।
पूर्वपदप्रकृतिस्वरबाधके गतिकारकोपेति तस्मिन्नेव स्वरे पुनरपि विना समासेन नैवत
स्मिन्स्वरे आद्युदात्तः असमस्तविषयत्वात् गतिर्गतादित्यन्तोदात्तेनात आह वैयाकरण
इति तत्स्थे इत्यर्थः तस्येति पेच अत्यस्येत्यर्थः तस्य प्रत्ययमात्रस्वरत्वन्तु नमानाभावात्
प्रतिपादितमिदं प्राक् नन्वेवं नविभक्त्याविर्त्यादीनामानर्थक्यं स्यात् इत्वकाले विभक्ति

चिं॰
१९

संज्ञाया अभावादत आह विभक्त्यादीति आदिना प्रत्ययादिपरिग्रहः एवेन पदार्थोपस्थितिः
विषयादिव्यावृत्तिः तत्रैव इत्संज्ञाविषये सूत्रोपात्त एव उक्तार्थस्य च संमतिमप्याहात एवे
दमिति पदार्थोपस्थितेरनुबन्धविनिर्मुक्तत्वादेवेत्यर्थः अन्यथा तदानीमनणत्वेनाशंका
समाधानयोरसंगतिः स्पष्टैव प्रत्ययग्रहणस्यादेशाद्युपलक्षकत्वादेवाह प्रत्ययश्चेति
उक्तार्थे भाष्यविरोधं परिहरति यत्त्विति अनेकाल्सूत्रे शिद्ग्रहणाभावे पि शित्करणादेव शि
सर्वादेशत्वमित्यर्थः यद्यपि सत अश्रवणार्थ इति शित्करणादिसक्तं तथापि तस्य फलान्तरा
भावात् पूर्वमित्संज्ञामकृत्वा नेकाल्त्वात्सर्वादेशोनन्त इत्संज्ञेति तदाशयस्य वाच्यत्वेन पूर्व
विरोध इति भावः तस्य भाष्यस्य इत्संज्ञकशकारेति बहुव्रीहिः इत्संज्ञाच विशेषणसत्त एव सा
प्रति कालाभोत एवाह भूतेति प्रसंगादाहाद्वेति अनुबन्धविषये इत्यर्थः अनेकान्ता इत्य
स्य व्याख्या अन्तवेति प्रकृत्यादीत्यादि तत्त्वं व्यतिरेकमुखेनोपपादयति योत्येकान्त इति

शाखादिरित्यर्थः छेदकेन तत्रानुपलंभादाह कदाचिदिति अयन्तु अनुवंधत्वावच्छिन्नस्त
तन्नष्या नावयवः तदर्थेति तदुच्चरितार्थेत्यर्थः बद्धा वयवित्वेनाभिमतार्थेत्यर्थः तथा चान
पलंभकयत्नं विना तत्रान्यत्रैवोपलभ्यमानो नावयवस्तं विनान्यत्रैवोपलब्धेमान्यत एवयः
सोवयव इति भावः नन्वेवमित्वस्यैवाभावेन मूलेकुठारएवस्यादत आह लत्यमिति उभय
त्र लक्षणेति भावः नन्वेवमपि हृत्तिर्तस्यात्सत्वस्याभावात्सामीप्येनत्वत्र हृतिरिति स्पष्टमेवा
त आहानेकालिति उच्चरणेत्यादौऽनित्वप्रयुक्तं कार्यं पूर्वस्यैवेत्यादिव्याख्यानतो निर्णी
यं तदाह स्पष्टं चेदमिति तेन लक्षणारोपकृतं वहुव्रीहिसंगीकारेणाभिन्न सूत्रविषयत्वा
त्कोटि द्वयेनाह उपालेति अत्रज्ञापकमप्याह तएवोपेति अनुवंधानामनेकान्तत्वादेव
त्यर्थः अन्यथाअप्रत्ययफलाभावादाह अप्रदितइति तत्वमुपपादयति अनेकान्तेति
हियतः पूर्वमनेके चिदिति सूचितामहचिं प्रतिपादयन् सिद्धान्तमाह परेत्वेकान्ता एवेति

वि॰
२०

अवयवापेक्षेत्यर्थः ननु तदभावसाधकहेतोरुक्तत्वात्कथं नत्वसत आह शास्त्र इति तत्रोपेति
विधेयबोधक इत्यर्थः एतेन विधेयेनालम्भेपि तस्याभावः सूचितः अत एवाहान्यत्रेति इदमपि
व्यतिरेकमुखेनोपपादयति अन्नवेति हि यतः एकेति संयोगादिनेत्यर्थः नैवमयमिति
अनुबन्धत्वावच्छिन्नेन तादृशसंबन्धेन सर्वत्रोपलम्भनत इत्यर्थः एवं तद्धेतुनिरासेन साधि
तेवयवत्वे साधकान्तरमप्याह किंचेति नन्वनयोः प्राक्गतिरुक्तैवात आहोक्तार्थेति दो
षान्तरमाह किंचेति अत एव तस्यैवम्याप्यत्वादेव उक्तार्थे भाष्यसम्मतिमप्याह तस्येति इ
तिसूत्रभाष्य इत्यर्थः नन्वेवमुपदेशग्रहणस्य कागतिरत आहोपेति एतेनोपदेशे किमग्नि
चित्सोमसुदितिहृन्निह्नुङ्क्रमत्रनन्त्वे लोपः स्यात् न च तुकोवैयर्थ्यमागमस्यत्यादौ साफ
ल्यात् न च क्विपः पित्त्वं व्यर्थमग्निचितावित्यादौ साफल्यादिति मिश्रोक्तं तस्यैवदंड्ढुक्तमु
पदेशे किं कृतिपातनकारस्य माभूत्तान्तलक्षणदीर्घत्वसवित्यादौ विभक्तिहेतुकेन

ङिः सफलः अप्रत्ययत्वेन नित्त्वस्याभावात् तत्र न सूत्रं न चापरत्वनिहतिस्तत्फलं तस्य तत्वेतस्य
दुर्वारत्वादिति रत्नाकरोक्तं च प्रत्युक्तं वक्ष्यमाणरीत्यानन्तरानतिप्रसंगात् आद्येफलाभावात्
लोपस्याफलत्वात् बहिरंगत्वेन खलोपासिद्धत्वेनानन्तत्वेनानतिप्रसङ्गात् खलोपात्प्रा
क्तनस्यामभिचिन्ताविरत्यादौ तुल्यत्वाच्चेति दिक् स्फुटीभविष्यतिचेदं पदार्थोपस्थितिरत्र एव
यविनिर्मुक्तस्यैवेत्यायुक्तेर्विधेयोवाक्यार्थबोधमाह सर्वत्रेति अनुवर्त्यैति बहुव्रीहिः विधेयोऽ
ति ज्ञानावेकवचनेन तत्र हलन्त्यमिति प्रवृत्त्याह नकारेत्संज्ञक इति चोद्यार्थे यद्यप्यत्र नेत्संज्ञाशा
स्त्र प्रवृत्तिस्तथापि लक्षणयाह नकारेत्संज्ञक इति मुख्यार्थबाधादेरिति भावः अत्र मानसा
ह स्पष्टमिति तत्र हि प्रायोगिकरूपाभावे औपदेशिकं रूपं गृह्यते इत्युक्तम् अत एवेति ईदृशबो
धाङ्गीकारादेवेत्यर्थः अन्यथेत्यस्यासंगतानावन्वयः नाव्यय इति नाभिमतनाव्यय इत्यर्थः आगन्यायाः
त्यत्रेति भावः आउजादीनामित्यत्र तत्पुरुषसत्त्वादाह तेष्वेतचेति यत्रेत्यस्यार्थः प्रयोगेति वाचा।

चि॰
२१

लइति सति तन्नैलिनीतिस्वरःस्यात् अत्रत्वंगत्वाद्विवक्षव्यर्थमेवस्यादितिभावः एतेन
सञ्ज्ञेत्यादौ सर्वथा तद्भ्योमनिन्निनिमनिन्नोमस्पृनत्वेनस्याद्वः परमः स्यादिति दंडयुक्तम
पास्त मुखादीनामच्युत्पन्नत्वात् अतएवैतस्य यन्नथावनमेवग्रे पीतिवोध्यम् चिरिणो
नीति अत्रापितत्वेइदित इतित्वमापत्तिः एतेन भूइत्सूकारस्यतत्वेभविन्नेत्यादावकदित्वा
दिडविकल्पापत्तिरिति दंडयुक्तमपास्तं प्रागुक्तरीत्यातत्रादोषात् नत्वेवं सतिस्रग्भिकर
फलेत्वापत्तेर्भूहवोरित्यादावानर्थक्यापत्तेश्चेतिदिक् द्वितीयोच्चारणादावति प्रसंगा
पत्त्या षष्ठी समासासंगतिश्च नयत्राहार्यमिति वक्ष्यमाणरीत्यात्वेनोक्तदोषस्तद्वस्थ्य एव
वात् आहार्यत्वं चेति ततस्तल्लाभोपायमाहोपेति उभयपदं समूलयति अतएव अन्य
थानस्य शास्त्रवाचितया तयोरुक्तसंगतिः स्पष्टैव नन्वेतावतायोच्चारणार्थत्वं नल
भ्यमतआहाविच इति कैयटेनोक्तमित्यस्माद्धेयंगः अत्रभाष्यसंमतिमप्याह तत्र

ति आदेव इत्यत्रेत्यर्थः उक्तमित्यस्यानुषंगः यदितच्छास्त्रपरं तदा तत्र प्रातिपदिकग्रह
णान्नदसंगतिः स्पष्टैव ननु तत्र तथोक्तावपि प्रकृते किमत आह प्रकृतेति इतीयपाद
प्रारंभोक्तोपदेशेऽजिती त्यर्थः यद्वा व्याख्यात्वेन प्रक्रान्तोपदेशपदलाभावयि भूतोपदे
शेऽजित्यर्थः ननु तत्रान्यथोक्तेः कथमत्र संमतिरत्वमत आह तस्येति मूलाद्यसंगतिं ध्वन
यन्सिद्धान्तमाह परेत्विति अपइति उद्देशे योऽनुनासिकस्तस्य माभूदिति शेषः उक्तमिति
उपदेशेऽजिति सूत्रे इभावः प्रथमप्रश्नाशयस्यैकेयटेनोक्तत्वेन प्रकृतानुपयुक्तत्वेन च द्वि
तीय प्रश्नाशयं तदनुक्तमाह यदीत्यादिना प्रश्न इत्यनेन प्रत्यक्षमिति आख्याने प्रत्यक्षत्व
स्याविशिष्टत्वादिंद्रियगोचरार्थस्य यदाख्यानं स उपदेश इत्यर्थः गुणैरिति प्रत्येकं साधा
रणाप्रसिद्धधर्मोपादानेन यत्प्रतिपादनं स उद्देश इत्यर्थः बहुत्वमविवक्षितं अवयवेति तत्ता
वच्छिन्नेस्पत्यर्थः दोषान्तरमाह नचेति चित्स्वित्यादीत्यादिनासिध्यप्तुष्याविन्यादिपरिग्रहः

चि॰
२२

ननु वदः सुपीत्यत्रोच्चारितस्यैव तन्त्रानुमानेन तस्योपदेशादिष्टसिद्धिरितिनाल्पदो
षोऽत आह वद इति प्रकृतिविशेषसंबद्धत्वादिति भावः इदमाद्येपिबोध्यम् इदं द्रूक्षयति
अत एवेति अनुवृत्त्यादिकं विना अन्यस्यान्यासंबंधित्वादेवेत्यर्थः सेन्यथाहेति अद्दन्ता
न्यप्रतीत्यर्थः इदं च मूलेपि तत्रस्पष्टम् अत्रेति प्रज्ञान्तोपदेशपदलाभावाधिसूत्रोपदे
शोऽजित्यत्रेत्यर्थः इति हेतोपवेत्यस्योपपादनेन्वयः लोकेति उष्टत्वकायाख्यानेउद्दिष्टो
मेनुवाक इति तत्रव्यवहारः मार्गप्रश्नेमुष्मिन्नवकाशे हस्तदक्षिणोग्रामस्य इत्यादिर्गौणः
शपणोउपदिष्टोसेपंथा इति च अपिनोक्तयुक्तिसमुच्चयः नन्वेवमेतद्व्याहृतावपि नतत्सं
ग्रहः सूत्ररूपशास्त्रे तेषामनुच्चारणात् अत आह तत्रेति वार्तिकोक्तावित्यर्थः तस्य करण
साधनत्वेन योगारूढनाक्रमेणनावाह प्रयोगेति तत्रैव रूढ्येमानमाह हलन्त्येति म
कारं विहाय सूत्रानुकरणम् एवमग्रेपि व्यावृत्तिरिति उच्चारित इत्यस्य व्याहारेणायात्वादा

उच्चारितानुनासिकस्येत्संज्ञेत्यर्थादन्यथाशास्त्रे तदविहितेनुनासिकत्वस्य तत्रापि सत्वा
दिति प्रसंगात्तादवस्थ्यमेवेति भावः नन्वेतावता किंमूलेहणमत आह तस्य चेति एवं च भ
ष्यविरोधाज्ञावेषज्ञानत्थार्थोक्तिरयुक्तेति भावः नन्वगतिकगति बाहुलकाश्रयणमेव
तत्र दोष इति तदेकदेश्युक्तिरत आह किंचेति मूलोक्तरीत्यैवाह पदान्तहलन्ताविति सूर्वस्मि
न्सति यस्मात्परो नास्ति सोन्त्य इति प्रागुक्तत्वादत आह परस्येति हलादेरित्यर्थः विशिष्टा
न्त्य इदिति षष्ठीतत्पुरुषः व्यर्थमिति हलन्त्यमित्यत्रेति शेषः एवं चाफलत्वान्नानुवृत्तिरि
ति भावः अत एवाह हलन्त्येति प्रागुक्तमिदमिदं दूषयति अत एवात्रेति प्रागुक्तरीत्योपदेश इ
ति सूत्र इत्यर्थः आस्थितेति तस्य दुष्टत्वस्य प्रागुक्तत्वादिति भावः स्वमते मूलरीत्या प्रसक्त
भाष्यविरोधं परिहरन्ति नचेत्यादिना सिद्ध इति तदन्यान्यथावर्तनेसिद्ध इत्यर्थः आदिना
न ह्याख्यानपरभाष्यपरिग्रहः लोपेति अन्यथेत्यादिः उक्तहेतोरेवाहेत्याशयादिति तदन्

वि॰
२३

इति वदतो मते वार्त्तिकाद्याशयादित्यर्थः अत एव सिद्धान्तमाह भाष्येति च त्वर्थे पूर्ववै
लक्षण्ये सामर्थ्येनेति उक्तार्थलाभात्तदिति शेषः अत्र मते तु तस्या स्वरि तत्वादेवशंकेति
बोध्यं नन्वपदेश एवेत्संज्ञा ततो धात्वादिसंज्ञेत्यर्थस्य तथात्व लोप इति सूत्रे भाष्ये उक्तत्वे
न कथमिष्टसिद्धिरेवं सतीत्यत आह तत्रेति व्यवसितपदार्थशरीरे इत्यर्थः नन्वेवमपि तत्र
निपातनपदोक्तिर्व्यर्था प्रातिपदिकत्वादेव सिद्धेरत आह निपातेति अर्थेवत्सूत्रे शक्तिलक्ष
णान्यतरसूपसूत्रे रेव निवेश इति भावः द्योतनाया अपि तत्र निवेशावश्यकत्वस्यान्यत्रोक्तत्वा
द्वा आहेति अनेन गोवलीवर्दन्यायो नास्तीति सूचितम् तत्र भावप्रकाशेस्य स्पष्टं व्यवसितप
दस्य निश्चितपरत्वभ्रमं व्यावर्त्तयति व्येति शास्त्रकृता तेन तत्त्वेन बोधितत्वादित्यर्थः उक्तार्थे
साधकान्तरं ध्वनयन्नोहेवं चोदेति तत्सामर्थ्यमनेषां ग्रहणे चेत्यर्थः आदिना शक्तादि परि
ग्रहः न च शक्तिस्ततः प्रत्ययत्वान्निदित्यत्र प्रत्ययग्रहणे पि दोषः इति चेदत्र केयटः एताव

व्युत्पन्नौ यद्यपि शाकेऽर्टीति त्रिति व्युत्पाद्यते तथाप्युपदेशे तकारोऽन्त्यो न भवतीती त्संज्ञा नेति।
वस्तुतस्त्वाद्यस्य व्युत्पन्नावपि तस्य तकारस्य तङ्कातिष्ठन्नत्वात्प्रत्ययानवयवत्वाददोषत्वान्न
ज्ञाव्युत्पन्नलोकेऽर्थफलं द्वितीयस्त्वव्युत्पन्न एवैतेषां तत्वस्यैव सिद्धान्तितत्वात् तदनन्तु हेतेर्भा
ष्याभिमतत्वाच्चेति बोध्यम् ननु कृरीत्याद्यर्थमित्संज्ञा ततः प्रातिपदिकसंज्ञेति कथमत्र निषे
ध प्रसक्तिरत आह अपवादेति वार्तिकोक्तनिषेधेत्यर्थः गोत्सर्गेति हलन्त्यमितीत्यर्थः क
थं इति निषेधेन तदभावादिति शेषः तन्नेति प्राप्तीति वार्तिकमित्यर्थः तितिप्रत्ययग्रहणा
त्वरितामामेराह फलेति आदिनालोपः तस्योक्तार्थसाधकत्वमेवं चेत्यनेनोक्ता विपदेऽसाध
कत्वमप्याहाद्वेति हलन्त्यमित्रेत्यर्थः तत्वन्यत्र भाष्ये तेषामनुपदेशस्यापि प्रतिपादनात्तड
स्थितिः संगतैव किंच भाष्ययोर्मिथोविरोधेन आहे तदिति आदेचइति सूत्रस्योद्देशश्च
त्यादिभाष्यत्यर्थः संभवत्येकेतिन्यायादितिभावः ऐच्ग्रहणेति गणादावपठितेत्यर्थः।

चिं
२८

उपदेशशब्द इति बहुव्रीहिः उपदेशः कर्तव्य इति शब्द इत्यर्थः तद्ग्रहणं च अन्तवादेति
प्रक्रियया तेषामसिद्धत्वादिति भावः नन्वेवं किमर्थं तस्य करणमत आह संदेहेति वर्णा
दीत्यादिः तथा चानुवृत्तिलस्य सिद्धा तत्र शंकते नन्वेवमिति तस्य भावसाधनत्वे यात
प्यार्थकत्वाभावे इत्यर्थः अन्यथा चरमेणापि तत्कृत्याप्रतिरस्य तद्विरोधेऽन्वयः स्वेश इति ।
भाष्ये उक्तमित्यत्रान्वयः तस्येतीति सूत्रद्वयस्येत्यर्थः सूत्रद्वयस्य युगपत्प्रवृत्तत्वात् अनु
च्यमानेऽन्तेति इत्यनुवर्त्यविधीयमानेत्यर्थः हि यतः तत्सूत्रद्वये आदिनावुहोलोपश्चेत्या
दिसूत्रपरिग्रहः यत्रेति पूर्वेण समानाधिकरणं अत्रेति पदात्तर उभयनिर्देश इत्यस्या
अतः पूर्वत्वायाह परत्वेति यद्यपि भाष्ये नवकाशत्वादित्येवोक्तं तथापि तदुदाहरिष्यमाणो
दाहरणविशेषापेक्षमत एवड: सीत्यादौ द्वयोरनवकाशत्वेऽपि न तन्निरिति भावः तत्रार्थे
शब्देन प्रयोजनादिवाचीति सूचयतस्य कैयटोक्तार्थमेवाह यथाविषयमिति यथाप्रदे

शामित्यर्थः यत्र पूर्वस्य कार्यं तत्र पूर्वबोधकपदस्य षष्ठ्यन्तस्योच्चारणं कार्यं यत्र परस्य का
र्यं तत्र परबोधकशब्दस्य षष्ठ्यन्तस्य तथेति यावत् तदाह प्राग्रूपेषु कार्यिण इति प्रदेशेष्वि
त्यर्थः षष्ठ्या षष्ठ्येव तेषु प्राग्रूपेषु सूत्रेषु ङसी स्यादादावुभयोरप्यनवकाशत्वादाह क्वचि
दिति गोतः स्यादौ सर्वनामस्थाने इति सप्तमी पूर्वत्र चरितार्था ङसः स्यादावचीति सोऽन्तरे
तिभावः षष्ठीति षष्ठी स्थाने इत्यतः स्यादिना तस्मादित्यस्य परिग्रहः पूर्वस्य कार्यित्वप्रतिपा
दनयोग्या षष्ठी तद्बोधकपदे भवतीत्यर्थः एवमग्रेऽपि हेत्वन्तरमाहोभयोरिति युगपदिति
शेषः काशात्वयोरित्यस्यावश्यकत्वेऽन्वयः पक्षान्तरमाहे कइति इत्यत्रान्यदेनतत्प्रकल्पकत्व
पदेद्वेषः प्राग्रूपः षष्ठीति परेणेत्यर्थः स्यादिति तदेत्यादिः तत्र स्यानितिविल्लुतिस्त्र
येन तत्र हेतुमाहोपेति हियतः षष्ठी प्रकृतेः प्रागेव परत्वादन्तरङ्गत्वाच्चोपदेशोऽन्तरकाल
स्तत्रैवेत्संज्ञोच्चारितस्य कार्यं तु प्रयोगे एवेति तत्र निरनुबन्धकस्यैव प्रत्ययत्वेन विधानात्स

शाह एवंतत्कार्यभागिति तदादेशस्य कृतः सान्तवेयकतेति भावः हेतुत्के भीवमाहेवंचेति
तथोक्तौ चेत्यर्थः तन्नुहेतिमिति अत एवेयं सिद्धान्तोक्तिः हलन्त्यमित्यत्रेति भावः तत्रगुणि
ज्ञितिसूत्रे विशिष्टेति अवयवत्यनो याताः परस्येति वक्रमशक्यत्वादिति भावः प्रहृत्यन्त
रेति पुनः प्रहृत्तोमानाभावादिति भावः तस्याः पंचस्याः मनोरमादिकं खंडयति एवंचे
ति तस्य तत्त्विनासाधकत्वे चेत्यर्थः प्रकृतेनेति प्रागवत् तदिति तस्मिन्निति सूत्रस्येत्यर्थः
अतो चित्ये हेत्वन्तरमाह लक्ष्येति टकृक्षमाविस्यादिविहितेत्यर्थः नन्वत्रग्येवसितान्तस्य ग्र
हणे सूत्रस्य तत्रापाठात् तदन्तस्येत्संज्ञा तस्यादन्तश्चाहाइडणिति क्रमविशिष्टसमूहित
स्य प्राक्तिरिति भावः परोक्तदोषात् तुहातिचिवड॰ इत्यादिनाउपदेशशाहेनकारणत्युत्य
स्माथात्वादिरूपशास्त्रस्यैवोपदेशज्ञितिसूत्रेऽपि ग्रहणादाह चोरीति केवलमिति तदन्त्य
त्वन्तुव्यपदेशिवद्भावेनेति भावः नन्वन्तुवन्त्यानामनेकान्तत्वपन्नसंभवेपिनैकान्तत्वे

तत्रसुत्येवयविभ्येववहुव्रीहेस्स्यात्तदेनवयवत्वादेवंचेदमेकदेशत्रुक्तिरेवेति नैवदो
षोयमिति सूचयन्नाहाद्बन्यानामिति नन्वेवंप्रागुक्त प्रथमकैयटस्यकागतिरत
आहे काचइति अपितामूलमतोरमादिसमुच्चयः नन्वेवमपि अन्यत्रोक्तस्यकागति
रत आहान्योपीति आदिवइति सूत्रस्यकैयटस्य तत्रसूत्रस्यतत्परत्वेनयुक्तत्वादाह त
ज्जातीयइति अतएवतत्सूत्रस्यभाष्यविरोधोपिन उपदेशोजिति सूत्रभाष्यन्तुव्याख्या
तमेव तद्धुनयन्नाहे काचइति उपदेशेत्वत इत्यादौत्विविति पाठः आदेचउपदेशइत्यादौ
त्वपपाठः नचतस्यकर्मव्युत्पन्नत्वात् आदिनाप्रत्यक्षमाव्यानस्योपदेशः उद्देशस्त्रप्रातिप
दिकान्तंतोपदेशाइत्यादिग्रहः णोसूत्रइति धात्वादावित्यर्थः नतेति अनुनासिकत्वात
नुनासिकत्वविवेकेत्यर्थः अनुनासिकत्वेत्यर्थोवा एवमग्रेपि प्रतिज्ञापाहे आनन्त्रोपस
र्गेइतिकर्मण्यपड् अतएवतेनसमानाधिकरणबहुव्रीहिर्नव्याधिकरणस्तदेनतस्फुटय

चि॰
२६.

ति प्रतिज्ञेति अतएवास्य सूत्रत्व इति वस्य योगः यत्तदंशो पाणिनीया इत्यस्य तस्योक्त
शास्त्राध्येतार इत्यर्थ इति तत्र छन्दो ब्राह्मणाभिन्ने तथानियमाभावादर्थासंगतेश्चे
त्युक्तं तथाप्याह पाणिनीति पाणिनिशास्त्र भाष्यवार्तिककृतोरप्युपलक्षणमित्या
शयेनाह प्रभृतीति एतेन पाणिनीया इत्यस्य तस्योक्त शास्त्राध्येतार इत्यर्थं मत्वाप्र
श्रसमानार्थकत्वाभावेनेदमुत्तरमसंगतमिति मन्दोक्तमपास्तम् वर्णा इति
वर्णविशेषा इत्यर्थः उद्देश्यमिदं सकलग्रन्थेषु न्यूनताधनतायसंग्रामादिसंग्र
हायचाह चायमिति व्यवहृति पाणिन्यादीत्यादिः अत एवाह ताभ्यामिति प्रत्ये
कमिति शेषः एवं चैतदध्येतृव्याहृतिः एतेन हृत्निकारादिव्यवहारात्तथेति सक
लग्रन्थकारोक्तमपास्तम् अत्र शास्त्रोक्तमयुक्तमिति स्पष्टमन्यत्र तदाह दिगि
ति तत्र प्रत्याहारेषु सिद्ध इति एवं च कथं तन्निर्देशस्य ज्ञापकत्वमिति भावः

यस्येति चेति लोपस्तु न परत्वेन विशेषविहितत्वेन च ह्रस्वस्येनादेशो वा यातम् अनन्तर

मपि न सङ्कुचतीति न्यायात् विकारात्मानु पूर्वैकेन लक्ष्ये लक्षणमिति न्यायाच्चेनोया

त्वात् तत्स्यापि तनासाशङ्कात्के तस्य सिद्धे रेतेन तदभावोप्यत एवेति रत्नाकरोक्तमपास्त

तस्यापीत्वविधिसामर्थ्यस्यापि तत्र हेतुमाह साक्षादिति नन्वेवं मूलासंगतिरेवात आ

ह निर्देशादिति तन्मूलेति निर्देशस्य मूलभूतेत्यर्थः अस्याप्राप्तत्वादाह तात्पर्यमिति ज्ञा

पकान्तरमप्यस्तीत्याह आदिनेति आदिनोणादयः पापाणके इत्यादि परिग्रहः एतेनोक्तार्थ वि

सत्वादेवाट्टीत्युक्तमिति रत्नाकराद्युक्तमपाकृतम् स्तुयोजत्वे संभवति तथोक्तेरयुक्तत्वादत एव

तात्पर्यमित्युक्तम् मूलकृदादिमतेनाह नन्विति नुपपन्नमिति न च तत्कुहणस्य सत्वेन

ब्रह्मणापि तदभावस्यतुर्वेचत्वादिति भावः अत एवाहेति भाव इति ननु कोसौ प्रत्याहारो

द्वेतोयहणं लोकशास्त्रान्तरप्रसिद्धार्थस्तत्रासंवद्धत्वात् शास्त्रे तत्र परिभाषितोऽनया

ह्रादिवितीति तद्व्याख्यानं सिद्धान्ते बोध्यम् मूले व्यव्यवच्छियत इति उक्तवार्त्तिकभाष्या
दाविति भावः ननु वर्णसमाम्नाये कारादिक्रमसत्वेनाकालइस्त्रचितमत आह ऊकूटे
ति तत्कृतपूभूतौ कौरप्रवेत्यर्थः तेन तत्रैव युगपत्क्रमेणोच्चारणादिति भावः क्रमबोध
नेनात्यर्थेण साख्यायाम्रल्पीयस्याइत्यनेन च तस्य पूर्वनिपातः एवमग्रेपि अत्रादौ तत्प्लुत
निर्देशो विभाषापृष्टेति हिशाद्वकारस्य प्लुतविध्यानर्थक्यापतेः निर्दिष्टा संगतेश्च अत
एव तमध्येपि तस्य निवेशो नो दीर्घ इत्यादिवैयर्थ्यापतेश्च मध्यमोत्तमयो वैपरीत्यम।
पि तोक्तहेतो रेमभ्यादाने इत्यस्यानर्थक्यापत्तेश्च पूर्वमध्यमयोरपि वैपरीत्यमुक्तरीत्या
ननु दे तदभिप्रेत्याह क्रमेणेति प्रश्लेषेण निर्देश इत्यर्थः ननु दीर्घ एव संज्ञा त्र्यथ करणा सा
मर्थ्यात् विशिष्टेकात्तुन संज्ञाप्रयोजनाभावात् संज्ञाकरणस्य लघ्वर्थत्वाच्च तदाह
व्याख्यानादिति अत एव संज्ञासंज्ञिनोः क्रमोपि मह्लासंज्ञाकरणात् एतेन यथासंख्य

सूत्रमिहैवोपन्यस्तंयुक्तमित्यपास्तम् तेनतरूपदेन सहशा इति एतेनकालोलक्ष्यतेइति स
कलग्रन्थकारोक्तमपास्तम् तथापिसामानाधिकरण्यासंभवात् वःकालोयस्येतिवि
ग्रहः कालइति ज्ञात्वा व्याख्यायामेकवचनं तस्यैवैकल्पिकत्वादिति बहुवचनंतत्फलितं
माह सकालइति उद्देश्यतावच्छेदककोटि प्रविष्टत्वयोकारादेरपिह्रस्वादिसंज्ञावोध्या
अज्झलोःप्रतिषेधे इति वक्ष्यमाणदीर्घप्लुतयोस्तुह्रस्वसंज्ञाप्रसंगइति उक्तं तद्दीत्याशंकते
नत्विति अन्यथोच्चारितस्यैवप्रत्यायकत्वात्सूत्ररीत्याभाष्यरीत्याचमिथः समभिव्याहा
रात् व्याप्यजातिग्रहणेनशंकैवनोदेति अतएवकालशब्दः प्रत्येकंपरिसमाप्यतेइत्युक्तं
भाष्ये तत्रैतत्स्यादुकारादयः कालशब्देनश्रूयतइत्यतआह प्रत्येकंचेत्यवकैयटेताव
तारितं चेतीतिवोध्यंवाक्ये प्रथमवाक्येइत्यर्थः अणत्वादिति अनेनद्वितीयवाक्यादोशं
कानिरासः यत्ताधिकेनव्यापकजात्यविवक्षणाद्वेत्यपिवोध्यम् संज्ञायामिति अत्र

वि॰
२८

प्रदेशाद्रूसाम्येन यथासंख्यं वोध्यम् नचनत्र संज्ञयावाधः एकसंज्ञाधिकारादन्यत्र
समावेशस्येष्टत्वात् यत्तु तथासत्यभ्यासस्य ह्रस्वविधौ दीर्घप्लुतयोरप्यापत्तिरिति
रत्नाकरस्तत्राप्येतत्वतरस्यामिति विकल्पविधानेन ह्रस्वविधाने द्विमात्राविधानस्य
ज्ञापनेन प्लुतस्य विषयेस्य तरस्तु के द्विमात्रस्याविधानेन च विधिमात्रे दोषाभावात्
तथा चानुवादे दोषस्तत्तु ह्रस्वनयनाह प्रदायेति आयुष्मान्भव राजन्नहं गच्छामीत्यादौ ङ
प्लुतस्यादित्यपि वोध्यम् अच्ग्रजिति स्पष्टार्थं संधिर्न अज्ञाचानेन विशेष्यते तेषां तस्य
स्याव्यभिचारित्वेन तन्नैह यत्र्यापत्तेरेवं सत्त्वकाराणामेव संज्ञित्वेन संज्ञाविधानवैय
र्थ्यापत्तेश्च विधिष्वेव तद्ग्रहणेनेष्टसिद्धेरपि तन्नैरच् तत्र अणुव्यसामानाधिकरण्य
स्वीकारे प्रोक्तदोषद्वयात् तल्लक्षणया सामानाधिकरण्येन तत्र च साहचर्यात्तरस्यासं
भवाद्धान्ध्यानाच्चकालकृतस्यैव तस्य ग्रहणमिति भावस्तदाह वाच्यग्रहणेति

इत्यर्थे लक्ष्ये सिद्धे इष्टे उच्चारितेति प्रथमवाक्ये इत्यादिर्वर्णेत्यर्थः कालशब्दस्य प्रत्येकं परि
समाप्तेरिति भावः तेनेति तेनोच्चारितवर्णेन गृहीतवर्णो इत्यर्थः इत्यर्थकमित्यदोषादिति
पाठः इति सूत्रार्थकमिति तदर्थः तपरेति अन्यत्रेति भावः इति केचित् उहूकाल इत्येवमत्रै
वेति भाव इत्यन्ये अत एव सिद्धं तु तपरनिर्देशादिति प्रागुक्तं तत्र न च तपरस्तत्कालस्येति
वत्कालपरतस्तत्कालस्येति सूत्राभावात्कथं समानत्वमिति वाच्यमेककार्यकरत्वादेव
सक्तेः तत्रूपपादितमेवेदमपि प्रागवदयुक्तमेवातएवाग्रे भाष्ये पदान्तरासंयुक्तानीति वा
च्यम् यत्तु अत्र ग्रहणसमुदायनिवृत्त्यर्थमिति भाष्ये रत्नाकरादौ चोक्तं तदसदिति ध्वनय
त्कालग्रहणं तु कार्यार्थमन्यत्र हि तीयवाक्यातिप्रसंगेन दोषाभावेत्याह त्वेचेति तथापीति
शेषः निपातएकाजित्यत्रैकग्रहणेन ज्ञापितत्वादिति भावः रत्वादिति अत्रोदीर्घत्वादिति
शेषः अन्वेहुत्यर्थमाह दीर्घादिति परत्वात्तक विकल्पापत्तिरित्यर्थः नित्यश्चेष्यते न च तत

दभावेनित्यत्वकद्रुर्वीरः सकृद्गतिन्यायात् भ्रष्टावसरत्वाच्च पुनः प्रसंगाविज्ञानं त्वी
हशोविषयेनेति अचश्चेति सूत्रैकैकपठे व्यक्तं तच्चं त्वगदानेव गत्वं सार्वत्रिकत्वेप्याहा
न्तरिति तदीयनिमित्तमध्ये तन्निमित्तस्यप्रविष्टत्वादितिभावः कृत्वात्वेति बहुव्रीहिः
ताजातन्तर्यैतित्वनित्यानास्येववानपवाहाजिति उत्तरार्धमपिवोध्यम् नत्वस्याना।
दिलाभः कथमतआह नाद्वेति नत्वनस्यनेनकथंलाभोनत्राहहोत्रेरिति तथाचोच्च
देशाधिकरणाहूतिरत्युः इत्यर्थः चोच्चारणमिति सान्नात्यंपरयावाप्रत्यासत्तेः कारका
णांतच्चैवक्रियान्वयनियमात् तच्च तथोच्चारणंच तात्वादीनामिति नत्रैवोच्चारणसं
भवात् भागंविनातथाऽपूर्वचत्वाच्चेतिभावः प्राचंप्रक्रियाकृतांमन्यत्रापि तल्वास्येति
सूत्रकृतावपिपतेनतालत्वमादितालवादिः समादिर्यस्येति बहुव्रीहिः तस्यहृषवहु
व्रीह्योरेकशेषोवेतिपरास्तम् आद्येविध्यभावात् क्लिष्टत्वाच्चन्यायतेशतृप्रयोगेणएव

त्युक्तेर्निष्फलत्वाच्च प्रयत्नेनेति काश्यपाग्निवेशेति शेषः ऊर्ध्वभागे मूर्द्धिस्थानोर्ध्वभागे वा इदं सर्व
मग्रेपि वोध्यम् वर्तत इति अच्चश्चेत्यत्रानुहृत्यर्थं तस्य स्वरितत्वस्यावश्यकत्वात् वक्ष्यतेत्रा
नुहृत्तेन फलमिति ध्वनयन्नाहोदात्तेति लोकेति अत्रैव सूत्रे भाष्ये स्पष्टमिदं तेषां तत्त्वमप्युपे
त्यापि तत्त्वभावमाह हलस्वरेति स्वरविधावित्यस्यार्थान्तरमत्वादत्रानुहृतेरेवं चेदं। अजिति
पदं। एतेनेदं प्रकृतत्सूत्रसमासस्येति सूत्रस्य भाष्यविरुद्धं तत्र हि हलस्वरेत्येव स्वाकार्यं नत्व
स्वरविधावित्यादि उदश्वित्वान् ग्रोघ इत्यादीन थासमनिमत्तपदादानत्व प्रसंगात् इंस्तु कान्तत्र
कथं हलोवरं प्राप्नुविरित्याशंक्य उच्चैरित्यत्र नन्विहातमिसुक्तमिति रत्नाकरोक्तमपास्तं आयेरु
नीति आकारो निपातत्वादाद्युदात्तः वेदभाष्यानुरोधेनाहार्वाङि. ति अत्र न पवाह पिबोन्त इति
आद्यस्य तदकारस्य। सम्भवात्यन्तान्तरमाहार्चेनमिति। समासस्येत्यन्तदपवादत्वादाह कृत्तु
नेरेति। गतिकारकोपपदेति विहितेनेत्यर्थः दादत्त्वमिति शेषं प्राग्वदिति भावः॥ विरोधादिति

चि॰
३९

तथाच पूर्वसूत्राभ्यां धर्मिपरावनुसूत्रानावपीह लक्षणया धर्मपराविति भावः। इतरेतरद्वं
द्वेपि वर्तिपदार्थयोः प्रकारत्वेनैकधर्मयोरपि प्रकारत्वेन तत्समूहे भावप्रत्ययेन मूले उदा
त्तानुदात्तत्वे इत्यस्योपपत्तिरत एव तस्य भाव इति सूत्रे कैयटे नोक्तं यवाविदित्वमित्यादौ
जातिसमुदाये भावप्रत्यय इति। तस्य च समुदायस्यानुभूतावयवत्वे एकवचनं उद्भूता
वयवत्वे द्विवचनाद्यपीत्याकूतं। भाष्योक्तं पक्षमाहापीति। भावप्रत्ययजं तदादिति भावः। अ
स्यापि वाङ्कुलकाद् विशिष्टत्वादाहास्येति। स्पष्टार्थेति स्पष्टं चेदन्तस्यादित इत्यत्र कैयटे
मुक्तादित्युक्त्या श्रोदात्तादयः। एतेन वर्णधर्मपरत्वेन प्रसिद्धानां तेषां धर्मिपरत्वं मतुपा वा
ध्वनितं इत्यपास्तं स्वरत्वमूलादेरसागमादत्यथा योजयति। ह्रस्वपदेति मूले बहुव्रीहिरि
ति भावः। ननु सूत्रे किं कर्मधारय एकदेशिसमासो वा अत्रेष्टोपि ह्रस्वशब्दस्य संकेतितस्य ह्र
स्वशब्देन ग्रहणं मतु मात्राकालिकमात्रस्य तादृशः ह्रस्वत्वगतस्वरितासंग्रहापत्तेः पूर्व।

निपातनवैपरीत्यापत्तेश्च कर्मधारययोगपदानां समासाभावाच्च नहि द्वितीयदीर्घप्लुतस्वरितानां सं
ग्रहापत्तेः ह्रस्वशब्दस्य मात्राकालिके ऽन्विसंकेतितत्वात् अन्येह्रस्वशब्दोच्चारणं व्यर्थं स्पष्टार्थ
मर्थमात्रमित्यस्यैव स्ववचनत्वादत आह ह्रस्वशब्देति। मात्राकालिकी च तथा। तत्संबन्धितद्व
टितयद्विशिष्टरूपं तद्धर्मत्वेनाबोधकमित्यर्थः मात्राकालिकाच्चत्ववदर्थत्वेनाबोधकमिति या
वत्। उक्तदोषान्तरमन्यदोषमूरीकृत्याह किन्त्विति। तत्फलमाहैवं चेति। लोके इति शेषः। अत एव
वक्ष्यति वेदे त्विति अत एव तस्येति ग्रहणं सफलं तद्धि दीर्घादिस्वरितसंग्रहार्थं। तथार्थत्वमन
स्यात् न च षष्ठीकल्पनार्थं सम्बन्धिशब्दत्वादेव सिद्धेः न च त्रिपादीस्थस्वरितसंग्रहाय तत्। अन्य
था ऽसिद्धत्वात्संनस्यात् भाष्यरीत्या तदभावात् तदेतद्ध्वनयन्नाह तत इति। अत एवैकश्रुतिं त्रै
तिस्वरितस्यासिद्धत्वादिमं मे इत्यादौ स्वरितमेशब्दात्परेषां गामित्यादीनामेकश्रुतित्वदाह सर्वं
चेदमिति तदुक्तं भाष्ये ऽर्थह्रस्वशब्दो ऽर्थमात्रायां रूढस्ततः प्रमाणे मात्रचोलुक् इति पठनेन तथा।

दशिउरत्नाकरायुक्तंसमंस्यादितिसिद्धेऽर्थग्रहणमपिव्यर्थमितिचरमोक्तंचापास्तंतैत्तिरीये
लोकवत्सत्वादाहास्माद्वेत्ति। एवंचऋग्वेदान्यपरमिदमितिसिद्धम्। अस्येत्यनुक्त्वाग्रकाल
स्वरितात्यमेपिउदात्तात्यमायाह्यानुदात्तेति। बहुव्रीहौपरशाहृस्यहेथाःपूर्वनिपातापत्तेराहो
दात्तेति। नन्वेवमन्यापेक्षयापरत्वेऽप्यानुदात्तस्यापितत्वापत्तिरतआहतयोरिति। प्रत्यास
त्येतिभावः अतएवाहोदात्तेति। प्रातिशाख्यसमाख्याबललब्धमर्थमाहलोकेत्वितितत्स्व
रितंहयोरपिकिंचित्स्वरेणान्तोदात्तत्वादाहृयेऽगाइतीति। इत्यत्रैत्यर्थः। स्वरित इति। पादिक
इतिभावः असिद्धत्वंतत्क्रमरीत्यानातएवाहनोदात्तेति। परमिति। स्वरितमितिशेषः। यत्तुदाडी
अहव्याश्चाविरयतः कर्मणिरायन्तिहात्सरितत्वसंज्ञापूर्वकविधेरनित्यत्वाहृद्यभावइतितन्न
तस्याअभावात्। तद्ध्वनयत्राह्याहेरिति। तथाचवेदभाष्ये अयंहीतिषड्चस्यषोडशास्तृक्त
स्यानादेशापरिभाषया इंद्रोदेवतातत्रयंस्तुपर्णाः परावतः श्येनस्यपुत्रआभरतपातचक्रयो

शश्लोवर्त्तनिरितिचतुर्थीशेपेनस्यतार्क्ष्यस्यपुत्रत्वनयः सुपर्णोयसोमंपरावतः परागतान्‌। दूरा
त्द्युलोकादाभरत्‌ कीदृशं तं शतचक्रं शतमिति बहुनामैतस्यकर्त्तारंमूलविभुजादित्वात्कः
यज्ञाशतकरणसाधनंबहुयागनिष्पादनमित्यर्थः चत्वर्थेकविधानमितिकः कृतादीनांक्
इतिद्वित्वंयः सोमः अह्युः अहेः वृत्रस्यवर्त्तनिः वर्त्तयिताप्रेरयितेत्युक्तं। यद्यप्याहिरिवभोगैरहिं
वृत्रमित्यादावाद्युदात्तत्वंपठ्यमानंग्रामादित्वाद्भवतिदगतानामितितत्रतत्रजनपदशतानां
मित्यत्रवृत्तेः एवंचोदात्तादनुदात्तेनिस्वरितेनतस्यानिकत्वाद्यणउदात्तस्वरितयोरिति अकार
स्यस्वरितत्वविस्वरविधौव्यञ्जनस्याविद्यमानवत्वेनोदात्तादितिस्वरितत्वेपिवातस्यासिद्धत्वे
नशेषनिघातात्प्रवृत्त्यास्वरितोवेत्यस्याप्रवृत्त्यापूर्वस्वरितासिद्धिरत्रपदेतथापिडकादित्वे
नवृत्तादित्वेनवान्तोदात्तत्वमत्राहिशवृत्तस्ययज्ञामकरवत्कठेस्यग्रिमेणछंदसिचेत्यनेननद
त्यार्थकेनलद्यातुसारादादिर्हितीयंवोदात्तमित्यर्थकेनाद्युनत्वंतथाचयणउदात्तस्थानि

चि॰
३२

कत्वान्नस्य स्वरितत्वे स्वरितो वेति प्रवृत्तेस्तु सिद्धिरिति तेषामाकूतं तन्न देत तदभिप्रेत्य सामान्य
त्वमाह्वोदात्तस्वरितयोरिति। छान्दसत्वादिति तत्र सर्वकार्याणां व्यवस्थितत्वादित्यर्थः
यदि तु दण्डयुक्तपदेषि छान्दसत्वाहृदभावस्तर्हि सोपि पक्षो युक्तः अत एव तत्रैवाहमतो
स्व्रत्वः गंतव्यः वर्त निर्मार्गभूत इति पदान्तरत्वेनोक्तं तत्रापि तथाहृदभावसाधनत्वचिन्त्य
मेवेति दिक्। वा स्वरित इति। स्वरितो वेत्यनेनेति भावः अनन्तरत्वादुदात्तादिसंज्ञकस्यैव परा
मर्शः इति भ्रमवारणायाहोदात्तेति। यद्यपि भाष्ये करणे ल्युट् टिशाकं व्द्वदिति वत्पदसंस्कारप
क्षे सिद्धेन वचनपदेन बहुव्रीहिरित्युक्तं तथापि बहुव्रीहितत्पुरुषस्थले लघुत्वाद्वाक्यसंस्का
रपक्षेऽनिर्वाहात्त्व तत्र युक्तमिति ध्वनयन्नाहोच्यत इति। एतेन मूलं फलितार्थकथनपरमिति
दण्डरत्नाकरोक्तं भाष्यरीत्या दण्डयुक्तं चापास्तम् समाहारद्वन्द्वे मुखनासिकमिति स्यादत।
आह मुखसहितेनेति। तयेति। आधिकरणस्यापि स्यात्ल्याप उच्यत इति वाक्करणत्वं यद्वा मु

त्वंकरणत्वमेवेत्यन्यत्रस्पष्टं। यद्यप्यत्र सूत्रेण समासमसिद्धिस्तथापि अन्यार्थं वार्त्तिकस्याव
श्यकत्वमितिसूचनायाहसाधनमिति। यमांमां विशिष्टप्रातिशाख्यविधानादाहेत्यत्रानुस्वा
रश्रुतिश्चत्यनेनतस्यलक्ष्ये इत्यर्थः। अननुनासिकस्यक्लीत्यादावनुवादेत्वप्रतिपत्तिरेवस्यादितिभा
वः। शाक्तइत्यादाविति पाठः शक्तेत्यादाविति पाठेक्तानसम्बोधनपरतयायोज्यः॥ नत्यादिति
नापिव्यापकजातिपक्षेनस्यापकत्वादित्यपिबोध्यम्। अतएवव्याप्यजातिपक्षेणसमाधत्तेनत
थापीति। नत्स्वरूपस्याप्यनत्वादाहाकारजातीयादेरिति। आदिनेकारजातीयादिपरिग्रहः
इदमपिनवास्तवमित्याहहस्वत्वेनेति तुल्यास्यसूत्रस्यभाष्याविरोधायाहविहितेनेति। अत्रमानमाहा
नएवेति। आदिनैवइगत्यादिपरिग्रहः उभयसाधारणमाहगानेति आश्चायादिनाऽऽगमशा
स्त्रीयमात्रकान्यापरागणायनीयशाखास्थस्तुजानेपश्चेत्यादिपरिग्रहः द्वितीयादिनादीर्घवि
हितल्त्ववर्णमात्रिकैजादिपरिग्रहः एतेनपूर्वत्रतथानुक्तत्वान्न्यूनतादोषश्चेत्यपास्तम्॥ नो

सि॰
३३

क्ता इति। चतुर्मात्रादय इत्यर्थः। प्रक्रियादशायां तत्तत्वे मानाभावाद्वेत्यपि बोध्यम्। अत एवेति
उक्तहेतुगणादेवेत्यर्थः। यद्यप्येकश्रुतावपि इदं सम्भवति तथापि तत्र किंचिद्वैलक्षण्यापादा
हैकेति। त्रैस्वर्याभावरूपत्वेऽदोषादाहस्वरान्तरेति। इदमिति। प्रागुक्तं सर्वं तस्यात्र स्मृ(?)पलक्ष
णमित्यर्थः। अपिना वेदपरिग्रहः। व्यधिकरणत्रिपदबहुव्रीहिनिरासाय प्रयत्नशब्दस्य पुं
स्त्वमेवेति ध्वननाय चाह तुल्याविति। अत एव प्रत्येकसाम्यमादायतनसावर्ण्यं अत एव चाकः
सवर्णे इत्यादौ सवर्णग्रहणमिको सवर्णे इत्यादावसवर्णग्रहणं च चरितार्थं। नन्वास्यशब्देन
कण्ठकाद्यादिस्थानग्रहणमत आह। स्येभवमिति। शरीरावयवाद्यदिति यत्। ननु मुखमे
वोष्ठावधिकाकलकपर्यन्तं तत्कुतो नेति चेन्नास्य पदोपादानवैयर्थ्यापत्तेः। अत एव व्यधिकरण
बहुव्रीहिर्न तदाह व्याख्येति। ननु स्थानमपीति वाच्ये स्थानमेवेत्युक्तं तत्त्वस्य प्रयत्नेऽपि स
त्वादत आह। प्रयत्नेति प्रफलमीह प्रकृष्ट इति प्रयोगः प्रागवत्। जनकत्वमिति जन्यता वि

शिष्टमितिभावः। वर्णानां जन्यतामते इदं नित्यत्वपदेनाभिव्यञ्जकत्वं तथेति बोध्यं। ननु प्र
यत्नस्य स्वतो भेदेन नानात्वेऽपि दैत्यारिरित्यादौ कार्यव्यक्तिभेदेऽपि स्थानस्यैकत्वात्तुल्यास्यत्वस्य भे
दाच्युतेर्न तत्पदे सावर्ण्यप्रसक्त्या कथं दीर्घोऽत आह तन्नदिति अस्योपपत्तिरन्यतो बोध्या इद
मपि परीत्येति ध्वनयन् सिद्धान्तमाह वस्तुत इति यथा चैतत्तथा मञ्जूषायां स्पष्टं एतेना
त्रहो तुल्यशब्दो न तन्त्रेण निर्दिष्टो न त्वेकः सदृशवाच्यपरो लक्षणयैकत्वसंख्यावाची तत्र।
चास्ये साहृश्यायोगात्प्रयत्ने चैकत्वायोगात्सम्भवानुरोधेनैकस्थाने सदृशप्रयत्नं च सव
र्णमित्यर्थ इत्यपास्तम्॥ उक्तरीत्या निर्वाहात्तत्र लक्षणाया अप्रयोगमानाभावाच्च तदेतत् ध्वन
यन्नाह स्पष्टमिति। प्रागुक्तं सर्वमित्यर्थः तदाहेति प्रागुक्तं सर्वमाहेत्यर्थः। कार्यगतभेदा
रोपं विनापीति निर्वाह इति ध्वनयन्नाह शिक्षायामिति। कण्ठादीनामिति। एतेनास्य शाह
स्य नतद्धितान्तत्वस्फुटीकरणाय तास्वादौ लुक्तं मूले॥ ननु कण्ठादीति तथा सति क

त्रि·
३८

एढश्रादिरवयवोयस्येति अनुत्पन्नप्राथमकल्पिकास्यप्रतीतिरपिस्यादेतेनवर्णसमा
म्नायेमातृकान्यासादौचाकारस्यप्राथम्येनावांतरयमेव्याहृत्तिः एतेनवर्णानांस्वरूप
तोभेदायकण्ठादिस्थानवान्तरस्थानभेदस्यावश्यकत्वेनभेदघटिततुल्यत्वस्यनञ्च
तिरित्यपास्तम्। भवेति। नञ्जवार्थकास्यशाहेनेत्यर्थः। आदायेति तथाचोपस्थितत्वेन
ततोऽन्तरङ्गत्वादेतज्जेदारोपेणैवनिर्वाहेनकार्यगतभेदारोपइतिभावः ननुतुल्यश
हस्यसंसर्वान्धिकत्वाद्यस्यपेनेतिलाभेपियस्येत्तहयेघेनवर्णेनतुल्यमितिमूलम्
शुद्धमेवातआह यस्मैतदिति। ननुकिंयावत्स्थानसाम्यमिष्टमुतयत्किंचित्स्थान
साम्यमतआह यज्ज्येकेषामिति। अन्यथायणामन्यत्रसावकाशेवाभित्वासवर्णे
दीर्घःस्यात्। नेतावितिः। ताल्वादिस्थानस्याधिक्यात्। तथाचयावत्स्थानैक्यपर्यन्तज्ञा
प्यमितितात्पर्यम्। अतएव। अतएवचएवमग्रेपिइष्टापत्तिंनिराचष्टेतेनेति। तथा

र्सावर्ण्येनेत्यर्थः। उक्तार्थगमकान्तरमपि ध्वनयन्नाह न ह्यातानामामिति आदिना तद्धित्वित्वस्या
दिपरिग्रहः। तेनेति। इतिपरसवर्णेनेत्यर्थः। मात्रे कार्त्स्न्ये। भेदे सतीति। सवर्णेति अन्यथाता
दृशसावर्ण्यस्य स्वस्य स्वस्मिन्नेवसत्वेन यथासंख्येन निर्वाहे व्यावस्थाधिकसंग्रहयोरभा:
वेनतदसंगतिः स्पष्टैव। साधितइति। यदि स्यान्नांशे नष्टेष्टस्यात्तर्हि प्रयत्नांशेऽपि तथैव
प्राप्तमेवेति ज्ञापकेन तन्त्रस्यायनप्रयासवैफल्यमेवेति भावस्तदाह तेनेति। साम्यइति
सवर्णसंज्ञेति शेषः यावदिति। एतेनान्यतरसाम्येऽपि तदापत्तेश्चिन्त्यमिदमिति केयटाद्यु
क्तमपास्तम्। अर्थमिति। तद्भिन्नान्नात्स्यपदोपादानादेव सर्वनाम्नादिति भावः। नन्वेवमपि
तद्वैयर्थ्यमपरिहृतमेवात आह तस्यादिति। एतेनवाक्यसंयोगव्यवच्छेदः। एतेन प्रत्येकव्या
पारनिरासार्थमुभयोरुपादानं तेनोभयसाम्ये सत्येव संज्ञा नान्यतरसाम्येपीति केयटको
क्तभोक्तं नतवाड्नायज्ञापकेनापि प्रत्येकव्यापारनिरासइतीदमयुक्तमित्यन्योक्तं विनि

वि॰
३५

गमकाभावादुभयसाम्येएवैतत्प्रवृत्तौ प्रयत्नग्रहणं चिन्त्यं। अन्यथा सत्यपि तस्मिन्न
न्यतरसाम्येप्रवृत्त्यापत्तिः इन्द्रोपात्तसाहित्यविवक्षायान्तु एकपदोपात्तत्वेनास्मन्मते
तदा तद्विवक्षायाः स्ववचत्वादिनिरत्ताकरोतीति च श्रयात्तं। लोप इति। इदमग्रेपि वोध्यं।
तत्रैव। वाक्यशेषोऽत्र नेत्यत्रैव। दोष इति पाठः तस्य च माभूदिति शेषः दोषादिति पाठे प्रति
किमित्यग्रे इति तु नेति शेषो वोध्यः। आवश्यक इति। तथा च सर्वेषामन्तत्वेवाच्यविशिष्टो
व मुक्तिरयुक्तेति भावः। स्पष्टत्वायाह च कारेति। एतेनेकारस्यागेवीजं चिन्त्यमित्यपास्तं
अपिनाकण्ठ्यापारः तथा। आवश्यकः नेतीति। तथाचाकारादीनां तदेवस्थानमन्ये
षान्तु स्थानद्वयमिति भावः। एवं सति प्राप्तातिप्रसंगं वारयति· कचयोरिति। ननु जि
ह्वामूले तु कुः प्रोक्त इति शिक्षोक्तेरत्र कुग्रहणमयुक्तं न च हृत्यादिप्रामाण्येन शिक्षास्य
जिह्वामूलपदस्य लक्षणया स्वसमीपदेशाक कण्ठवोधकत्वमत एवातिप्रसंगवारः।

णायतस्य रूढिकल्पनानेति लाघवमिति वाच्यं मानाभावात्। न चात्र कण्ठपदं लक्षणया
तत्स्थमेवेति वाच्यं अहयोः कण्ठ्यत्वस्य तत्रोक्तत्वेन तद्विरोधापत्तेरत आह तत्रेति लक्षणेति
भावः। समीपेत्यनेन तत्र मूलं प्रदर्शितं। श्लिष्येति समूहपरं। एवं सत्यतिप्रसंगं निराच
ष्टे जिह्वेति। चत्वर्थे रूढिर्योगमिति न्यायो ज्ञातव्यः संधेयः इदं दृढयति अत एवेति तस्य
तत्र रूढेरेवेत्यर्थः। अन्यथा कोरपि तत्वात्तस्य च वर्णसमाम्नाये सत्वात्तदर्थं शास्त्रान्तरे
णागणनेकार्ये सामान्यतस्तेन शब्देन तत्र गणाना संगतिः स्पष्टैव नन्वेवं नम्रपूर्वकादीनां
कण्ठस्थानत्वेवाधितेन तल्पस्थानत्वात्सवर्णपदशक्तिग्रहे कुशब्दस्य तज्ज्ञाहकत्वमण्डदि।
त्सूत्रेणावोधनीयमिति कथमत्र वाक्ये कुशब्देन पञ्चानामुपस्थितिरत आह तदिति निर्ण
येऽइति। तथा च तस्य प्राक्ज्ञातत्वेनादाननिरिति भावः। नन्वेवमेतद्भक्तिर्व्यर्थाऽत आह अकुहे
त्यादीति। साधारणेति। अकारादीनां कंठस्थानत्वादीति भावः। नत्विति। उक्तदोषात्। नत्व

चि·
३६

विसर्जनीयमात्रस्यकण्ठ्यत्वेशिक्षाविरोधोऽतआह विसर्जेति। साहचर्यात्। उपक्रान्ता।
कारसमभिव्याहारात्। यथाश्रुतंतुनयुक्तमित्यत्रस्पष्टं। एवंचेकाराद्युत्तरस्यतस्यतत्र।
तस्थानत्वेबोध्यं यथाश्रुतेअनुपपत्यालक्षणयाहदन्तेति। तत्सेवकाः प्रदेशाइत्यर्थः। तद
भावमाहातइतिध्यायेत्। उच्चार्येत्। नन्वेवसत्युभयोरप्यनेनशब्देनव्यवहारःस्यादतआह
रूढेति। ननुशिक्षायामनुक्तत्वान्नासिकायाःस्थानत्वंनिर्मूलमतआहानएवैषामिति
भादीनामित्यर्थः। भवत्यर्थकेतिपाठः। इत्यर्थकेतिपाठान्तरं। अनुकरणत्वमुभयथापित
थाचव्यवहारान्यथानुपपत्त्यानत्वंसमूलमितिभावः। एवाङ्नहृदाद्युक्तिं एवाङयतिय।
त्विति। स्थानत्वेइतिनासिकायाइत्यादिः तथाचवङ्करीषीत्यादौपरसवर्णोङ्ञयतापत्ति
रितिभावः। नत्वेतु। सावर्ण्याङ्गीकारेतु। पत्तिरिति। तथाचत्वत्तयसीत्यादौङ्ञयापत्तिर
पीतिभावः। भाष्यात्। करणत्वमुत्पत्तिप्रदर्शकात्। नन्वेवंकेषांचित्स्थानत्वेनकेषांचित्कर

णत्वेन व्यवहारे बीजाभावोऽत आह स्थानत्वेनेति। कंठादीनामित्यादिः। वर्णानां नित्यत्वादाह
वर्णाभीतिनाल्वादौ। कण्ठादौ आरोपबीजमाह वर्णजनकेति। वर्णाभिव्यक्तिजनके सत्यर्थः।
आदिना मध्यादिपरिग्रहः। वर्णो सत्येति। तथा च व्यापारवत्साधारणकारणत्वेन मुख्यं त-
त्र तत्त्वमिति भावः। अन्यत्र गौणं तत्त्वमित्याह तत्स्वेवन्येति। ननु एवं वायुत्वस्य न संग्रहोऽत आह
वर्णाभीति। वायुत्वं निरूपयति कण्ठेति। आदिना सङ्कोचादिपरिग्रहः। सामानाधिकरण्ये
नान्वयः। यत्त्वेवं विभागे नासिकायाः स्थानत्वलाभेऽपि शेषणत्वस्यालाभादु ह्रिसूत्रभाष्यविरो-
धापत्तिः तस्मात्स्थानं स्थानं न च स्थानमपि तत्र स्पर्शणपदेन विवक्षितमप्रसिद्धान्तान्नैतेो
त्तेल्यस्थानाविस्मादिभाष्यविरोधादनिष्टप्रसंगादनुनासिकसंज्ञाविधेर्नैष्फल्याच्चेति
न यत्किञ्चित्स्थानसाम्ये सतियावत्प्रयत्नसाम्यं सा वर्ण्यहेतुरितीहैव सूत्रे भाष्ये स्पष्ट-
मिति केचित्भोक्तं निरस्तमिति रत्नाकरस्तं खण्डयति अकारादीति। भेदकत्वादिति भाष्य

वि॰
३८

ग्रन्थः। त्र्येत्रेषु। अकारादिषु। तद्रूपेति। आनुनासिक्यरूपेत्यर्थः। अत एव नासिकामनुपस्था
ह्वनत इति योगसंगतिः एवं च एडुत्वादिवत्स्यधर्मो गुणरूप एवेति तत्त्वं न तूक्तरीत्येति न भाष्यवि
रोध इति भावः। यत्तु खाण्डनकृदादिर्व्याप्यारमात्रेण तस्याः स्थाने ऽनुनासिकाकारादीना
मपि तत्त्वप्रसंग इति तदनुरूपान्मूननादोषामूले इति तत्त्वाणयति एवं चेति। उक्तरीत्योक्तव्यव
हारोपपत्तेश्चेत्यर्थः। गुणेति। तथा च गुणजनकत्वाभाव इति भावः अत आहानुनासिकेति।
तद्व्यवहारस्य तत्रैव तथा प्राक्प्रतिपादितत्वादिति भावः। नन्वेवं भाष्योपपादने नियामकाभा
वेन तदुक्तरीतिर्विकृतो नातः आह एकोयमिति। दृष्टान्तेति भेदकत्वेत्यादिः अत्र जात्यात्मना नै
कत्वमभिमतं तथा सति तस्या व्यक्तिभेदादेव भेदोपपत्तेर्गुणकृतभेदपर्यन्तधावनासंगत्या
दतः किन्तु व्यक्तिकृतं तदाहात्मात्रेति। नन्वेवमप्युदात्तत्वादीनां गुणत्वव्यवहारो भाष्यादि
कृतोऽसंगतस्तेषां वर्णोत्पत्तिप्रागभावित्वादास्यान्तर्गतत्वाच्चात आह होदेति। रूपेति एतद्रू

पसादृश्यमात्रेणेत्यर्थः। यद्रूपं सादृश्यमिति मतेनेदं अतिरिक्तं सादृश्यमिति मते तत्तद्रूपाणी
ये न तत्कृतेन नेमेति वाच्यं। एतदर्थमेव पूर्वमध्यमविशेषणद्वयं अन्यथा स्वरूपभेदायाद्यस्यैवा
प्यत्वापत्त्यस्यावश्यकत्वे सपिनदाधिक्यं स्पष्टमेवेति भावः। नन्वकारादित्तल्पताङादीनां कुतो ना
तत्राह ङादीनां त्विति। मन्वेवं शिरसा विरोधोऽत आह नान्तःस्थारेति। उक्तत्वमेव प्रतिपादयति अत
एवेति। ङादीनामन्तःस्थानत्वादेवेत्यर्थः। आदिना तालव्यङ्कार इत्यादिपरिग्रहः। अन्यथेति स्था
नानीत्यसंगतिः स्पष्टैव। ननु तत्र तत्पदेनास्यएवाभिमतोऽत आह नासिकाइति। नन्वेवं याव
त्स्थानैक्याभावेन कङयोः सावर्ण्यं न स्यादत आह कङयोरिति। आस्य इति सूत्रेन स्यात् तद्धितान्त
त्वेन व्यधिकरणत्रिपदबहुव्रीहौ प्रमाणाति प्रसंगवारणाय उक्तमेवेत्यादिः। प्रश्ने इति देशविशेषा
णफलाभावादिति भावः। प्रयत्नेति। सोत्रत्वात् द्वन्द्वसाधुत्वमिति भावः। तस्मात्तु नासिकास्यप्र
क्रमात् गुणशब्दो कैश्चेति भावः। तत्रस्येति। नासिकास्थ्येत्यर्थः नाग्रहणस्येति क्व स्तः पाठः सम

स्तेपादेऽभयोरप्येकदेशान्वयोगुरुकुलादिवत्तु शेषषष्ठ्या समासस्य बोधने भाष्यस्य कर्त
त्वेनोक्तेः करणत्वेनान्वयः। अन्यथा न तस्यानेन तत्कथनवैयर्थ्यापत्तिरस्य ग्रहणव्यावर्त्यानां सा
वर्णानुपयुक्तानां प्रदर्शनमेव हि तत्र प्रक्रान्तं अनेन पवचगणाइत्युक्तेः अधिकमुच्यानादोस्यानु
नासिकाऽऽस्यान्तर्गतेति कैयटादिसम्मतपक्षेऽणं दमनप्वाह नासिके नि भाष्यादिसंमतवाद
यमेव पक्षोऽयुक्तः इत्युच्यानादोस्य एष मनन एव वक्र वचनोक्तिः। तस्य वाह्यप्रयत्नत्वं द्रष्टव्यमिति।
अत एवेति तस्य तत्वादेवेत्यर्थः। अन्यथा तत्तु पक्रमेण तत्समभिव्याहारेण चास्यानुनासिकाइ
त्युक्तसंगतिः स्पष्टैव। नक्तावित्ति। भिन्ने पदे हे ति पादपूरणे तत्र न्यूनतां निराचष्टे नादेतीत्यादि।
योबयोः तयोरपि। एवमग्रेपि। अन्वितिन्तस्येत्यादिः। अणोप्रगृह्यानुनेत्यादिवत्तत्र विध्यभावात्
एवञ्च प्राग्भयत्रहादशोक्तिः सम्भावनाभिप्रायान तु सत्ताभिप्रायेति बोध्यं अनुस्वारो नमा
अनुनासिका इति तैत्तिरीयप्रातिशाख्यं यमानुस्वारनासिक्या नानासिके अनुनासिकाश्चे।

त्तमा इति कातीयप्रातिशाख्यं। वर्गोत्तमा ङञणनमा अनुनासिका भवन्ति च शाखान्तरे स्वस्वस्थाना
धपरित्यागद्वारेण नासिकास्थाने द्वितीयमेषामित्यर्थ इति तज्ज्ञाख्यं चात्रानुकूलं। नासिके इत्य
स्य द्वे इंद्रे स्थानमित्यर्थः। एतेनाचार्यणामिवङ्मामपि नासिकाव्यापारसहकृतं कण्ठादिक
मेव स्थानं न तु स्थानद्वयं पाणिनिशिक्षायामनुक्तत्वात् अमोनुनासिका इति वाक्यप्रयत्नप्र
करणे पाठाच्च। यथा तैत्तीया इत्यादिभाष्योक्ता कातीयादिवचनद्वयस्य तत्तच्छाखामात्रविष
यत्वाच्चेति रत्नाकरोक्तमपास्तं। एवं तैत्तिरीयप्रातिशाख्येपि नासिक्या नासिकास्थाना अनु इत्यनुना
सिका वेत्युक्तत्वात्तत्र मतद्वये बोध्यं नासिकात्र मूयमानुस्वारास्तत्र भावाः उद्देश्यसमर्थकमिदं।
अनु इत्यनुनासिका इत्यस्य यथोपपत्तिस्तथा स्थूलं प्रभाष्यामनुस्वारस्यास्थानत्वाद्ग्राह्यताक्तिः तदाहाल
निति। लोके तिसृणामानामपि तत्र तत्स्थानत्वानुभवात्। अत्र मानान्तरमप्याह तथा चेति। ल
सा इति पाठः। नन्वासः स्थानत्वेनोक्तोपि न द्विषयो नोक्तोऽत आह हकारमिति। पूर्वोक्तेरसंयु

न्तं कण्ठमाहुरिति द्वितीयवाक्यार्थः। एतेनाकुहेत्यत्रापि हकारस्तदसंयुत एव विवक्षि
तः अन्यथैतनाह्निरोधापत्तेरिति सूचितं। ननु मूल एकादशस्थानान्युक्तानि तस्य चाशयः
मनुदितमतिरिक्तं स्थानमिति एवं च शिक्षायां कथमष्टा विभक्तिः तत्राह एविति। वि
ह्नेनेति शरीरावेत्यनेनेदानीं तत्राभवत्वादिति भावः। अर्वाचीनप्रयोगमनुक्तार्थसाधक
त्वेन प्राचोक्तं खेडयति दन्त्योष्ठमिति तत्प्रयोगसाधनाय कौस्तुभाद्युक्तं खेडयति एते
नेति दन्त्योष्ठमित्यादिनैतत्प्रयोगासाधनेन न स्वार्थः एवं च शिक्षायामनुपपत्तावपि मूल
मप्युक्तमेव न ततो न्यूनाधिक्यसत्वात् इति बोध्यं तदाह दिगिति। ननु प्रयत्नशब्दस्याभ्यन्तर
परत्वस्य प्रागुक्तत्वेन तत्रस्यवक्ष्यमाणभेदासम्भवेन मूलमयुक्तमत आह सूत्रे इति प्रयत्न
योस्तत्त्वहृयोः प्रतीत्या चेति स च पाठः सूत्रेणेति। अन्यथा तदानर्थक्यं स्पष्टमेव। एवं च
सूत्रमनेनेदं। न चैवं संवृतोक्तिरधिका। अअ इति शास्त्रविधेयत्वेन तदुक्तेः तदेतदत्राशय

पदस्य चितामरुचिंचध्वनयन्नाह भाष्येति। एवंच समप्रपत्तांगीकारेच। एवंचतद
र्थज्ञापकानुसरणमर्थमितिभावः। अत्र पदेनाक्कलाविति सूत्रं प्रत्याख्यानमिति
भ्रमं निराचष्टे नाक्कोलाविनीतितस्यैव। प्रयत्नभेदस्यैव। पर्यन्तरूपेति पर्यन्तदेशरू
पेत्यर्थः। आदिनोपाग्रादिपरिग्रहः। विकाससङ्कोचरूपकार्यकरविवारसंवारभेदा
याहहेत्यादि। तत्रस्पृष्टादीनामुख्ये इति। इत्यादिशिक्षेति। अनुपदमेव स्फुटीभविष्य
तीयं। अत्र सर्वत्र मानमाह तथाचेति। पाणिनीये तिशेषः स्पर्शाभावेति। तथाचह्र
वस्यानलाभः इत्यतेन तत्र शाब्देषच्छहमात्रचाग्नितेनष्टवौन्नरसाहचर्यादितिभावः। शला
मीषत्स्पृष्टत्वस्यार्थस्पृष्टत्वस्यचाभावादसंगतिपरिहार इति। तेनेतीईषदिति। अजपेच्छये
तिभावः। अत्र न एव वाहयणपेदेति। अत्रेति। तेषांभेदेनकथनेसतीत्यर्थः। एवञ्चासावर्ण्ये
ऽस्यहेतुत्वंफलति। ननुतस्यसंवृतत्वस्यप्रयोगाच्छिन्नान्तरादकअइति सूत्राच्चलाभेपि

चि॰
४०

विवृतत्वस्यैवासिद्धा कथमवधारणगर्भोक्तिरत आह प्रक्रियेति। सर्वत्रेति भावः स्प
ष्टं चेदम् अइउण् इति सूत्रभाष्ये अन्यथा। सर्वत्र तत्प्रतिज्ञाया अभावे। दीर्घाणामाकारे।
ण। ननु विवृतकरणाः स्वरास्तेभ्य एओताभ्यामप्यैऔताभ्यामप्याऽऽकारः संवृतो
कार इत्यस्य शिक्षोक्तेराकारस्य विवृततरत्वलाभेन तस्य विवृतत्वप्रतिज्ञायामपि सा
वर्ण्यासिद्धिस्तद्वदेवेत्यकारस्य विवृततरत्वमप्रतिज्ञेयमत आह दीर्घेति अत एव
वा अइउण् सूत्रस्य भाष्यवार्त्तिकादिसंगतिः अन्यथातिप्रसंगापत्तिश्च तदाह दि ति
ति। तस्य ह्रस्वाकारस्य सूत्रे ग्रहणमिति ग्रहणेपि लघुप्रयत्नेति आद्यस्य विवृतत्वाद्विती
यस्य संवृतत्वात्। सूत्रमतेनाह सवर्णेति भाष्यमतेनाह जातीति व्यापकजातीत्यर्थः
तथाचाकारादीनन्तत्वम् विध्योः संवृतैवारितार्थ्यादिति दंडीनन्तन्त्यैकस्वदाह
रणमितिन्यायेन सामान्यशास्त्रवैयर्थ्यापत्त्यानत्रेष्टसिद्धेरत आह गोयुङ्माति

त्यत्रेति इत्यादावित्यर्थः आदिना गुडलिहामानित्यादिसंग्रहः सिद्धान्ते जश्त्वासिद्धत्वा
त् चर्त्वे जश्त्वानुनासिकयोरसिद्धत्वाद् भष्भावेनुनासिकस्यासिद्धत्वाज्जश्त्वेनुनासिक
इति प्रक्रियाहस्य क्रमनन्तर्भूतत्वात् चादेरसिद्धत्वाच्च वत्वस्याप्राप्तिरेव तद्दीप्यैवाह
चर्त्वेत्यादि अत्र यम्भावस्तादृशाविधि पदे त्रिपाद्यामप्रवृत्तो गोऽहमदित्यादौ आदौ च
त्वजश्त्वयोरेवप्राप्तावपि चर्त्वस्य पदान्ते सर्वथा निरवकाशत्वेन जश्त्वबाधकत्वेनादौ
चर्त्वं ततः परत्वेन भष्भावादन्तरङ्गत्वेनानुनासिकात् आदौ जश्त्वं सर्वथानवकाशत्वादे
वस्वस्य पूर्वं प्रवृत्तिरिति बाधकस्य लेबाधके कृते सन्निहितत्वादुत्सर्गप्रवृत्तेरङ्गीकारात् न
नः शिष्टेनुनासिके कृते फलवत्त्वेन भष्भावो न स्यादिति नन्वसिद्धान्तप्रोक्तप्रक्रियाया
मपि नात्र पदे साक्षात्कारः वैषम्यात् तथाहि प्रागुक्तरीत्या जश्त्वाभ्यासप्राप्ते त्वेपि तदुत्तर ।
मनुनासिकतोन्तरङ्गजश्त्वतोऽयेन नाप्राप्तिन्यायेन सर्वथा निरवकाशत्वेन च बाधकत्वे

चि॰
५१

नचवत्वमषुभावयोरेवप्राप्तिः नचान्त्यस्यनत्वेपिवत्वस्यनसावित्तिमविषयेन
डित्वा नित्यादौ नदविषये चारितार्थ्येनकण्ठ्यत्वमितिवाच्यम् तावन्मात्रफलक
त्वेनश्रुत्येवसिद्धेसामान्यसूत्रस्यनैरर्थक्यमितिन्यायेनाचारितार्थ्यात् नसावित्यत्र
दप्रसङ्गोपत्वत्रापितथावाच्यम् एवंचनयोर्मध्ये विशेषेणपरत्वस्यतुल्यत्वेननित्यत्व
स्यभिन्नयोविषयेमिथश्चारितार्थ्येनापवादत्वस्यचाभावेप्यल्पापेक्षत्वेनान्तरङ्गः
त्वाद्दन्त्यावत्वानुनासिकात्वे पूर्वंवत्वापत्तिः एवंचाङ्कुरीत्यत्र तत्रोभषुभावजश्चानुनासि
कानाक्रमेण प्रवृत्त्यायोगात्युगपन्नित्यादि स्यादिति सएवदोषोदेयः किंचसर्वथानिरव
काशत्वेनवाथोत्तरस्तुत्सर्गश्च [illegible]मावण्यन्यत्रवाध्या प्रवृत्तिरिति सिद्धान्तात्तत्रवत्वेनज
श्चस्ययेननाप्राप्त्याभषुभावा नुनासिकयोरन्तरङ्गत्वेनवाधात् भषुभावादीनामप्रा
प्यावत्वमेवस्यादिति नेष्येववाच्यमिति छत्वेन्यादिचिन्त्यमितिचेदत्र एवंत्रिभाव इष्यते

नासचिसूचकेनतँदुप्यक्त्वा त्यसिद्धान्तस्वरूपमाह वस्तुतइति चात्वेऽस्त्रुपलक्षणं

ध्वस्यापि उक्ताशयानभिज्ञः शंकते नचेति नतोवन्धात् यक्षात्वरूपइतिन्यायेनपा

क्षिकं सिद्धान्तं प्रसंगात् प्रतिपादयन्समाधत्ते विप्रेति नन्वेवमपिकार्यकालेदोष

एवानन्ताह पूर्वत्रेति तस्याविप्रतिपरिभाषायाः एवंप्रागग्रेपि· एवेनकार्यकाल

त्वव्यवच्छेदः इदञ्चसकृद्गतीतिन्यायपक्षावलंबेनोक्तम् पुनःप्रसंगेति पक्षेत्वप्रा

गुक्तमेवशरणम् ननुकथन्तेनतत्त्ववोधममतस्याहान्यथेति तेनतदवोधनेऽप्य

र्थः सिद्धत्वेपीतिसिद्धान्तेपिपूर्वहष्टेतिभावः परीति परिभाषान्तराणामित्यर्थः

क्वचिन्नैथवपाठः इवास्यामपीतिपाठः तेनेति परेणेत्यर्थः तथाच तदसंगतिःस्प

ष्टैव· तथाचसिद्धान्तमनोरथेलोपएवस्यान्नोत्वमितिभावः इदानींभाष्यासंगति

रपीति ध्वनयन्नुक्तहेतोरेवउक्ताशयकमनुक्तदोषंहृद्धयति अतएवेति अधिकारत्वे

वार्तिकसंमतिमपि ध्वनयन्फलान्तरमाहाथीति· एवं सति स्वगृहे वाक्यार्थस्य
न फलासिध्याहे वेचेति अधिकारविधित्वे चेत्यर्थः तस्य तदापूर्वत्वस्य दुर्वचत्वादाह
तस्यासिद्धत्वमिति एवं सति प्रथमवाक्यार्थासङ्ग·तिं परिहरति क्वचिन्नु पादे ति
प्रथमसूत्रेनुवृत्ताविदं संग्राहकवाक्येकस्यचिद्ग्रहणे मानाभावेनोपस्थितत्वाद्वि
शेषाणां सर्वस्यैव ग्रहणादिति भावः द्वितीयादावाह क्वचित्सूत्रान्तरे इति तत्र द्वितीयप
दे योजयति तत्रावमिति वस्योपस्थिताविति विशिष्टसूत्रस्याधिकारत्वेनेति भावः
अत एवाह वाक्यभेदेनेति इतिरन्वयसमाप्तौ उक्तार्थे ज्ञापकमपि सूचयन्नाह तत एवे
ति वाक्यभेदेन तस्यान्वयाङ्गीकारादेवेत्यर्थः आदिमानन्तुदादेशे इत्यादि वार्तिकसं
ग्रहः न निषेध इति शास्त्रासिद्धत्वनिषेध इत्यर्थः अन्यथा तु त्व·विधानन्तरमेव न ने
इत्येव ब्रूयात् एतेन तं त्रेण तदुपस्थितो पदेकवाक्यतयान्वयेन पूर्वकार्यं प्रत्यसिद्धत्व

विशिष्टोष्ठो भवतीति वाक्यार्थः विशिष्टविधौ विशेषणविधेरार्थिकत्वान्न स्तने
इत्यादिभिरसिद्धत्वनिषेधोपपत्तिः नैर्हि स्वविषयेन न्यक्कात्राणां विशेष्यविधित्व
मात्रं वोध्यतेऽन्यथास्त उक्तहेतोः शास्त्रनिषेधेन शास्त्रस्यैव निषेध्यत्वस्योचितत्वात्
कार्यासिद्धत्वे न तथास्त्व वचनेऽपि सिद्धान्ते नयाद्युर्वचनत्वाच्च नन्वेवमपि नेष्टसिद्धिः
सर्वसपादसप्ताध्याय्यापेक्षत्राप्राप्तेरेवञ्चापवादस्य सर्वत्रासिद्धत्वे उत्सर्गस्याप्य
सिद्धत्वापत्तिस्तदभावेऽन्यत्राप्यसिद्धत्वानापत्तिरत आह पूर्वत्रेतीत्यादि नस्येति यत्रा
न्तुद्गातिलस्येत्यर्थः यत्र खण्डनकुदादिः असिद्धं प्रागेव तज्जानमित्यर्थः एवं च कार्यासि
द्धत्वेऽपि मनोरथ इत्यादावुत्वे कार्ये रलोपस्य प्रागेवाप्रवृत्तो रोरुत्वस्याप्रतिबन्धान्नाति
स्त्रिरप्रस्तहा किं च सत्यपि शास्त्रेऽज्ञानेऽपि च कार्ये शास्त्रप्रामाण्यात्कार्यमात्रेभावारोप
णारोपत्वेनानर्थेति तदसत् सूत्रपाठे कार्यापाठात्सर्वशास्त्रविहितत्वादिरूपपर्व

चि·
४३

त्वायाश्रयणेोल्लक्षणापत्तेश्च दोषान्तरकथनद्वारा तदेतद्दूषयन्नाह सिद्धमि
त्यादिना यावदर्थमाह प्रवृत्तमिति एवमत्रापि सिद्धे शास्त्रार्थे त्वत्र सिद्धशास्त्रस्यान्या
र्थत्वादाह सिद्धश्चेति तत्रस्समासघटकत्वेन भेदार्थकत्वादाह तद्भिन्नमिति ज्ञा
नस्यैवेति निश्चयस्यैवेत्यर्थः तथा च भवेन्न तथैव कार्यकारणभावो नयनात् तदा
हदृष्टमिति पीह व्याकरणे शास्त्रेति पूर्वत्रासिद्धमिति शास्त्रेत्यर्थः आहार्येति
वा यत्कालिके छाजन्यनिश्चयोपीत्यर्थः तथा सति कस्य चित्प्रवृत्तिः कस्यचिद्
प्रवृत्तिरित्याशयेनाह शास्त्रस्येति अत्र प्रकृतसूत्रे· मनोरथासिद्धिस्तु नः तत्र दर्श
नाभावरूपेऽलोपे भावारोपस्य दर्शनारोपरूपत्वात् द्वितीयाभावस्य प्रथमाभाव
प्रतियोगिरूपत्वस्य प्राचां मते सत्वात् सूत्रसामर्थ्यादस्य वाऽत्राङ्गीकारात् देवदत्ते
तिन्यायेन भावप्रतियोगिकाभावस्यैव देवदत्तादिपदस्वारस्येन विषयत्वात् त

देतद्दूषयन्नाहाम्रू इत्याद्यसिद्धिरिति आदिनाश्रमीत्यादिपरिग्रहः तामेवाहादेति।
परत्वादिति उक्तरीत्येतिभावः यत्तन्न्यायानङ्गीकारेयं दोष इति मान्यास्तदसदिति
भावप्रकाशे स्पष्टन्तद्दूषयन्नाह देवेति· पतन्नूपण्यवेति आदिना हृद्यादिसंग्रहः अ
तीति सिद्धेऽसिद्धत्वातिदेशादित्यादिरोपासंभवेनेति· पूर्वत्रेति सूत्रोदाहरणसंपत्त्या
तूक्तरीत्यालब्धे इति शेषः एतेन वस्तुतः कार्यासिद्धत्वेपि न दोषः शास्त्रयोः स्वतो
विरोधेन तस्य कार्यद्वारकत्वात् अन्यथातिप्रसंगो मनोरथ इत्यादौ विरोधप्रयोजकी
भूतकार्यासिद्धौ शास्त्रस्यासिद्धत्वेपि न ढंसकत्वल्पत्वात् एतेनाम्रू इत्याद्यसिद्धिः प्र
त्युक्ताश्रमीइत्यत्रैत्वई दितिसामर्थ्यादेत्वोत्तरमुत्वस्य सुवचत्वात् वार्तिकविरोधस्तु तो
त्तरस्य कार्यस्याभावादिति व्याख्यानात् नच न्यायविरोधः एकत्रविषये स्वस्वकार्य।

चिं
४४

द्वाराप्रसक्तविरोधयोः शास्त्रयोः परशास्त्रीयकार्यस्यासिद्धत्वेन स्थानिनोति
वर्तकाभावात् भाष्ये तु न्यायमवष्टभ्य शास्त्रासिद्धत्वमाहतुः तदप्राप्तिमभिप्रेत्य
प्राच्यनिष्कर्षमाह तत्रेति यत्नाकरोक्तिरपास्ता उक्तहेतोः उक्तरीत्या तद्भावोप
पादकहेतुत्वसिद्धेश्च उक्तरीत्याल्लाघवेनैव नईदित्यस्य शास्त्रासिद्धत्वे ज्ञापकस्यैवो
चित्यात्तन्यायस्यानित्यत्वं तन्मूलाभावादयुक्तमित्यन्यत्र स्पष्टमिति दिक् ननु सि
द्धान्तेपि क्वचित्कार्यासिद्धत्वमेवावश्यकमन्यथेष्टासिद्धेरेवञ्च सर्वत्रैकरूप्याय
तथैवास्तु अत आह शास्त्रेति तुः उक्तवैलक्षण्ये न दोष इत्यन्वयः अन्तरङ्गत्वादि
ति स्वनिमित्तस्यैवादौ सत्त्वादित्यर्थः न त्वन्तरङ्गपरिभाषाविषयः त्रैपादिकेन्तरं
स्वेरु नास्य। तद्धे परीक्षात्। लोके हि द्विविधं दृष्टं स्थितो कार्यस्थितिसंपादकं स्वास्थितावपि तत्स्थितिसंपादकं च। तत्राद्यं
यथा। न्यायनये ऽपेक्षाबुद्धिः स्वास्थितो द्वित्वरूपकार्यस्थितिनियामिका तन्नाशे द्वित्वनाशाभ्युपगमात्। तथा
वेदांतिनये प्रारब्धस्य संसारस्थितिनियामकत्वं तन्नाशे न। तथोपाधेः स्फटिकलौहित्यादिनियामकत्वं। द्वितीयं
यथा। दंडादितन्नाशेपि घटनाशादर्शनात्। शास्त्रे तु लक्ष्यानुरोधाद्भवस्था यथा कथंचिन्निमित्तविनाशे पूर्वम
नुसृत्तो तु न कश्चिन्न्यायो नापि संप्रतिपन्नो दृष्टांतः समर्थग्रहणस्यापि लोकसिद्धार्थज्ञापनेन चारितार्थ्ये संभ
वे लोकसिद्धादृष्टे तादृशार्थज्ञापकत्वे मानाभाव इति। वस्तुतस्तु पदावधिके ऽन्वाख्याने सेदुस्त्र आसितिस्यैतेदृ
संप्रसारणयोः प्राप्तोप्रतिपदविधित्वेन शीघ्रोपस्थितेस्तात्स्यैवं संप्रसारणे वकारादित्वाभावादिटः प्राप्तिरेव न। लक्ष्या
नुरोधाच्च पदावधिकमेवान्वाख्यानं निमित्तसिद्धिः। अत एव भाव्य बोध्यकाद्यस्यानुच्छेरव इतीयं नास्त्येव। विस्तरस्तु परि
भाषेंदुशेखरे द्रष्टव्य इति बोध्यं। तदाह। इयमिति। मूले। इति परिभाषाप्रकरणमिति। अष्टाध्यायीस्थपरिभा
षाणां प्रकरणमिति समासविग्रहः। परं नित्यांतरंगेत्यादि तु प्रासंगिकं। तेन परिभाषाप्रकरणस्य प
रिभाषाणामत्रानुपन्यासेपि न क्षतिः॥ ॥इति परिभाषाप्रकरणम्॥ ॥इकोयणचि। ननु संहिता[illegible]या

विषयस्य समीति संहिता विषये इति वाच्ये पुनरुक्तिरयुक्ता अतः संबंध्याकांक्षायां शांतये सदोषदर्शनेरमा
यीति। मूलंसमूलयति। इदमिति। इदमपि व्यक्तिपक्षे इति सूचनद्वारा मनोरमादं ऋमादिग्रंथासंगत्यमु
ग्र्याह। जातीति। अपि सूत्रस्यैव समुच्चायकः। एतेन लाकृतिरित्यादौ वकारवारणाय प्राथमिकबोध्ये एवप
दाद्वयस्यांगीकारः। एतदाशयकमेवोक्तसूत्रद्वयभाष्यमिति रत्नाकरोक्तमपास्तं। उक्तहेतोः। अन्यत्रा
रेऽक्तस्थानकादेशलाभेनाधिकस्थानकस्याप्रवृत्तेस्तत्र दोषाभावाच्च। नन्वेवं सानुनासिकानुकरणे
इति दध्यत्र इत्यादौ स्थौ न स्यादित्यादौ चानुनासिकस्थाने सानुनासिको न स्यात् द्वयस्योपादानादतआ
ह। अनुनेति। नन्वेवमपि गुणाभेदकत्वं दुर्वारमेवातआह। गुणेति। प्रतिपादितमिदमध्यस्तात्। एतेनसा
नुनासिकप्रतिपादनपराः सर्वे ग्रंथाः परास्ताः। मनोरमारत्नाकरदं ऋमादिग्रंथासंगत्युद्भावनायाह। री
चीदीनामिति। एवं नव्यक्तिपक्षनिरासः। तत्र कथमपि सर्वत्रानिर्वाहः स्यादेवाह। अतएवेति। जातिपक्षा
श्रयणादेवेत्यर्थः। तस्कलं तवाताभित्यादौ सलोपः। सूत्रं च भिश्चाद्दत्यादौ सावकाशं। अन्यथैकव्यक्तिरूपाद
नादन्यतरस्येवतत्त्वं स्यादिति भावः। ननु मास्तु दीर्घादिषु यणतआह। व्यादेति। दिगर्थस्तु शाब्दरत्नादौस्प
ष्टः। ननु नैकसूत्रार्थांगीकारे शास्त्रस्य साध्वनुशासनत्वमिति सिद्धांतभंगापत्तिरतआह। व्याकृतीति। क
रणेत्युक्तू। पक्षेति। वाक्यकल्पने हेतुत्वेनान्वेति। ननु प्रकारांतरेण शास्त्रसार्थक्यमास्तामतआह। मूडीति।

शि०
६२

वाक्यस्वरूपमाह। यदिहेति। शास्त्रइत्यर्थः। परीति। निसुविष्युद्दे[illegible]तोऽस्येवंछिदकानाक्रांतेनानुपूर्वीरूपेणेत्यर्थः। ज्ञायं। बोध्यकं। स्वरूपं।
अर्थेति। तद्व्यप्रमाणकत्येत्यर्थः। ननु भवतेरर्थस्ये मूलोक्तपक्षेतु कागतिरतत्राह। कार्येति। [illegible]त्र पक्षे पूर्वकार्यकारणेन साफल्येन
शास्त्रस्यावेयर्थ्यादाह। पूर्वेति। पाणिनेरितिभावः। रदिति। उक्तवाक्येत्यर्थः। ज्ञात्वाश्रयणस्य फलांतरं ध्वनयन्प्राचो क्तं खंडयति। र
तेनेति। अस्यार्थमाह। स्थानतइति। यत्तु यत्र स्थानप्रमाणभेदे कार्यभेदस्त्रैतेस्यादोत त्रैव तस्य बलवत्त्वं न तु सर्वमुक्तिरिति खिंलमेत
दितिभेदः। तन्न। प्रथमांतपाठेकार्यभेदलाभेपि सप्तम्यंतपाठे स्थानिभेदलाभेनतत्त्वर्चनेः सत्वादेर्थांतरमाह। स्थानेंतरेति।
चौतेयोऽन्यः। विध्यर्थइति। वाक्यभेदेनविध्येः शाद्वत्तस्य चकइत्यर्थः। [illegible] वेदं। हयवरट् सूत्रे। भाष्येइति। तत्रैव योग
वाहानामविशेषेणपाठपक्षेपंचफलानीमध्येद्वित्वफलोपपादनावसरे ऽरः कः ऽरः पः अनचिच अचउत्तरस्य यरोद्वे
भवतइतिद्विर्वचनं सिद्धं भवतीत्युक्तं। अन्यथा तथोक्त्यसंगतिः स्पष्टैव। एओङ् सूत्रे इत्यपाठः। तत्रतदप्रसंगात्। अत्रै
वद्विर्वचने यणो मयइति वदतावार्त्तिककृतास[illegible]स्यात्राभगवतापीदंध्वनितं। यरइत्यतोवानुवृत्तौ मानमाह। सूत्रे
ति। तस्यनिषेधप्रकरणेपाठादाह। द्विवाभेति। एवं च निषेधविधिविकल्पफलितइतिसौत्रिसूत्री। एतत्रार्थमेव
स्वस्वमतप्रयुक्तिदोषपरिहारार्थं[illegible]तितत्त्वं। अवसानेइति। वाक्वागित्यादौ भाष्योदाहृते। अन्यथालाघवाद्धलीत्येव
वे[illegible]भावः। प्रसक्त्येति। तथाच प्रसिद्धं दोषापत्तिरिवेतिभावः। स्थानेद्विर्वचनपक्षे लक्ष्यभेदइतिखंडनकाराद्युक्त्यसंग
[illegible]याह। इदमिति। आष्टमिकवर्णद्वित्वमित्यर्थः। तत्रस्य पदद्वित्वं स्थानेद्विर्वचनस्येव युक्तत्वादाह। नाष्टेति।
भक्तेरिति न्यायेनाह। यद्दति। आदिनायणइत्यादिपरिग्रहः। षष्ठीत्वेति बहुव्रीहिः। सर्ववाक्यं सावधा
तन्यायेन लब्धावधारणस्य वच्छे[illegible]खंडनकृत्द्रत्नाकरादिग्रंथासांगत्यध्वननायाह। नन्विति। व्यस्येतिशेषः।

तुन। पूर्वत्रासिद्धेन कथं लक्ष्यैकत्व मत आह। विकार इति। तस्यैतान्यत्वेनेत्यर्थः। अन्यथोदवोढामित्यादावुदवह
सुतामित्य वस्यार्थासिद्धलोपादेरसिद्धत्वाद् धूलं ते ति वद्वृद्धौ वोकारे उक्तन्यायेन न वृद्धिः। तुन इति। सिचि वृद्धिरिति
विशेष्यः। पूर्वं मकारस्य तत ओकारस्येति लक्ष्यभेदसत्त्वात्। तस्मादङ्गीकारः। एतेन ततो दस्यष्टुत्वमिति
स्तं। तदाह। इत्यन्यत्रेति। शब्दरत्नादावित्यर्थः। लक्षणप्रतिपदोक्तपरिभाषया स्थानिकार्यमादिश्येनेति न यु
ज्यते विषये तदप्रवृत्तेः। तद्धनयन्नाह। स्थान्यादेशेति। स्वरूपभेदादित्यर्थः। नन्वेवमपि तस्यानापत्त्यै इ
त्यन्... यन स्यादेवात आह। स्वंरूपमिति। तत्र साख्यानपक्षे तत्रापि तत्प्रकारो बोध्यः। अस्य न स्यादित्यत्रान्वयः। त
मेव प्राप्तिप्रकारमाह। तस्थाने इति। स्थाने प्रसंगे। आदिना ...ादिन्यायेनेति। प्रासमिति शेषः। अन त्विव्याथवि
ति। प्रसज्यप्रतिषेधो न पर्युदासस्यान्यत्र भिन्नाश्रयविधौ इत्सर्वेषु क्षेरस्के न तत्त्वंतीत्याद्यसिद्ध्यापत्तेः। स्थानव
त्वाश्रितविधावन्यविध्याविसर्गे बहुविवेसाद्यसिद्ध्यापत्तेस्तदाह। नत्विति। यद्यपि कष्टायेति ज्ञापकलब्धमिदं तथापि
ततो ज्ञापकबाधाह। प्रत्यासत्तेरिति। तदपीमाह। आदेशेति। इदमपि प्रत्यासत्तेरेव लब्धं। तदिति। विजादेशे सत्यर्थः। तद्विधिर्मो
श्रयेनेत्यर्थ इति पाठः। तदेतस्य रवृत्तीत्यर्थः। अतएवादेशिन्यलि आश्रीयमाणे प्रतिषेध इति नाथं संगच्छते। व... स्यतो र
त्वाद्यवासर्युदासएवोचितइत्यस्पष्टीकृतमत्रैव तावप्रकाशे। मूलं तु मूलाद्यनुरोधेन। एतेन प्रसज्यप्रतिषेध ए
वायमिति रत्नाकरोक्तमपास्तं। भाष्यादिग्रन्थास्त्रोदासीनाः। पर्युदासे व्याख्यायिक निषेध्यमादाय प्रतिषेध्यमदहा
रांगीकार इति बोध्यं। अतएव शास्त्रीयमार्ये एवायं स्थानिवद्भावइत्यत्र सूत्रे शास्त्रीयकार्यस्याभावात् तिदेशेनेति नाय
कइत्यादिसिद्धिः। अतएव किरतेल्लवनइत्यादिनिर्देशासंगतिः। अतएवात्र यद्यत्रैवाक्यशेषाध्याहारो नेति बोध्यं। स

आलि स्थान्य... वयत्वं विध...

मित न ६३

स्थान्यवत् भिन्न... आपरो... सिद्धिप

त्रार्थ्यपि मूलं सफलमाह। अत एवेति। आद्यार्थांगीकारादेवेत्यर्थः। तथा च तत्राश्रयग्रहणमपि मेवेति भावः। नन्वेवमारिस्सादावदादेशो
यथोद्देशपक्षेपि संपूर्णविकारत्वेनैकदेशेसत्तिन्याया प्रवृत्त्यापाप्पासत्त्वं दुर्लभमिति हलादिशेषेण स्यादित्यत आह। अप्याप्तोरि
ति। वादिति। बोध्यइतिशेषः। ननु यथोद्देशं पूर्वभागस्यासत्त्वात्कथं तत्व मत आह। तस्यापीति। एकदेशेति न्यायेनोद्दे
रितयोर्द्वयोः शब्दरूपयोः सत्वमित्याह। द्विरुक्तेति। ननु येषां न तथाज्ञानं तेषां का गतिरत आह। प्रक्रियेति। तस्यद्विती
यं प्रयोजनमाह। अत एवेति। उक्तोऽर्थः। तस्फलायाह। उकारेति। अन्यथा सिद्धिखंडनेनेदं दृष्टव्यमिति। यत्त्रेति। नव
त्वयेदृति। अपिः पूर्वविप्रत्यायसमुच्चायकः। ननु पायस्योपार्थातरादूषकत्वात्कथं तत्व मत आह। अस्यापीति। तन्वंतीस्या
देरपीत्यर्थः। वार्तिके। तस्रतीके। नन्वेवं तेनैव निर्वाहः। अत एव कौस्तुभसंगतिः। एवं च नेद माद्याध्यासाधारणफल
मितिवाच्यं। तदनंगीकर्तृमूलमते दोषध्रौव्यात्। एतदर्थमेव तदंगीकारः। सूत्रइत्यत्र स मनोरमा विरोधापत्तेः। क
थं तर्हि तन्वंतीति पंचमीसमासस्त्वं प्राग्वत्वमिति चेत्। हरदत्तमतेनेत्यवेहि। इति कौस्तुभसिद्धांतविरोधाप
त्तेस्तदंगीकर्तृमतेप्यनित्यत्वात्। पीपचन्नित्यादिलक्ष्य■विशेषमात्रपरत्वात्। अत्रापि निर्वाहात्। नचात एव व
हि॰ गस्यचयस्यासिद्धत्वान्निर्वाहः कौस्तुभादावुक्त एवेति वाच्यं। अंगात्परस्य वक्ष्यमाणार्धधातुकस्येडित्यर्थेन तस्यापि
ति भावः। द्वितीयार्थफलमाह। प्रदीव्येत्यादौ चेति। चौंरतेर्ण्यंयौ। प्रत्यासत्तिलभ्यार्थफलमाह। स्यान्यलि
ति अतिदेशेनार्धधातुकत्वादिति भावः। यद्यपि रामायेत्यादावेव फलं तथापि तत्र कष्टाय इतिज्ञापकात्सिद्धि
रित्याशयेनाह। वभूवीति। आदिना रुदितामित्यादिसंग्रहः। अत एवाह। वक्ष्यादीति। तदेवाह। नहीति। यतइ
तत्र स्थान्यंसेवैव त्रापि निबंध स्यादितिभावः। ... न्यत्राश्रयविध्यौ नेत्यर्थेन वभूविवेत्याद्य

८१ धे

६४ सिद्धिरेव द्विविध निमित्तत्वस्य तत्र सत्वादतआह। यन्निमित्तेति। प्रत्यासत्त्येत्यादिः। वार्ध्येति। स्थानिवद्भावेन वादेस्ति
त्वमिति न्नत्वाभावादार्ध्धधातुकमित्यस्याप्राप्त्या लिङ्गत्वस्य तिङ्व्येव प्रवृत्त्या तत्रातिदेशेनैव तस्य लाभ एवं नान्य
तादृशस्याऽन्यसाधारणं हेतुगर्भं विशेषणमाह। वल्येति। नतदिति। आदेशेपि तस्य सत्वात्। तत्रैवेदं
बोध्यम्। कैयटकौस्तुभकृदादिभिः पंचमीसमासादिनाऽन्याय्यासिद्धिस्तन्वतीत्यादेरुक्तेरसामर्थ्यत्यादौ च सूत्र
स्या लम्बुत्वे तस्वी क्रियते तेषां मते नासाधारणत्वनिवेशो न सिद्धांते। न सारीति स्वन्यत्र दृष्टत्वाद्दूषितं मतत्वाच्चाव
श्यकी। अत एव पूर्वं रेफेत्यारिल्यादावुक्ताधिकं तन्वतीत्याद्युक्तं स्पष्टं चेदमन्यत्र। अत एव नीलोत्तादि विरोधोना
पिपूर्वापरविरोध इति। केचित्तु द्वितीयस्यारम्भानावश्यकहितोत्तरमेतदुक्तेस्तत्रैवासाधारणत्वनिवेशो नाद्यव्या
ख्यानेइति न कोपि विरोध इत्याहुः। विशेषमाह। प्रत्यासत्त्यावेति। प्रतिपादितमनुपदमेव। नायकेति। तदा
दीत्यर्थः। विशेषांतरमाह। प्राधान्यादिति। अत्र शास्त्रातिदेशेपि न बाधकमित्याह। शास्त्रेति। सर्वत्रेति भावः।
तुर्यपदस्याद्यतिदेशवैलक्षण्ये। अपिः कार्यातिदेशसमुच्चये। तं समर्थयति। नाव्येपीति। तत्रैव सूत्रे इति भावः। तत्रै
जेति। विण्वद्भावे इत्यर्थः। अंगस्येति। प्रकरणादिति भावः। सिद्धमिति। इष्टं सिद्धमित्यर्थः। कथमित्याशंकायामाह।
अंगमिति। कार्यं च न दीर्घादिरूपं किंतु शास्त्रविहितस्तु प्राग्दिवक्ष्यमाणभाव्यादित्याह। तत्रेति। तयोर्मध्ये इत्य
र्थः। कार्यं तु। प्रधानकार्यं तु। इतिरितन्मतसमाप्तौ। अत एवैतस्यापि भवत्रान्वयः। अत एव च संगच्छते इत्यस्यस्य
ष्टार्थी पुनरुक्तिः। परिवीति। वेञः क्विबंतस्य रूपं। तुकः परत्वाद्दृढ इति दीर्घः। नन्वेवं सामर्थ्येत्यस्य सिद्धावपि
परिवीरित्यस्यासिद्धिरुभयोरनेनैव प्रापणादतआह। तत्रेति। एवं सामान्येनैव बोध्यः। विशेषबोधसामग्र्य ६४

भावादिति भावः। एवेनैतद्देशान्यवच्छेदः। एवमग्रेपि। तथापि पाठक्रमपरत्वासंभवादाह। परेति। तेषां। दीर्घादिकार्याणां। अ
त्रेति। अनयोर्मध्ये इत्यर्थः। अत्रैवेति। प्रकृतसूत्रे एवेत्यर्थः। अतएवेत्यपपाठः। असंबद्धत्वात्। स्थानिवन्मिति। अत्र
पक्षे इत्यर्थः। तत्र हि किं स्थान्यन्ताश्रये कार्यं निषिध्यो? पात्रमात्राश्रयेइति संशयः कृतः। आदिनाटदुपधत्वपरि
ग्रहः। अग्रे आदिनावृद्धिपरिग्रहः। अग्रे आदिनास्थानित्वात्सुप्संज्ञास्वाश्रयं च यजादित्वमित्यादिपरिग्रहः। किं
विदितुक्तिं सफलयन्विशेषांतरमाह। एवमिति। उक्तवदित्यर्थः। अपिनोपदेशसमुच्चयः। अस्य फलमाह। अतए
वेष्टेति। नकेवलमत्रैवेदमित्याह। सर्वेति। विशेषांतरमाह। यन्निमित्तेति। अतएवसासौ नित्यानिटत्वादनीति
दृष्टाइतिवर्यैरित्यादिपरग्रंथसंगतिर्वारणायेति। यद्यपिसमुदायविकारएवनेतितासर्थीतदाह। सर्वे सर्वेति। पदमि
हार्थवत्। यौगिकत्वात्। कल्प्यमानत्वादेवाह। आनुमानिकस्थान्यादेशभावस्यपदैकादेशस्यापीति। अपिनामुख्य
समुच्चयः। अन्यथातु तस्यैव ग्रहणं स्यान्नतु तस्यापि। प्रत्यक्षत्वेन प्राबल्यात्। तेनेति। तिकृत्वादिर्दर्शितेन। तथाच निघा
तसिद्धिः। अत्र पाठांतरं न युक्तमिति बोध्यं। आदेशग्रहणं व्यर्थमेवेति शंकते। नन्विति। पुंक्ते पुनिश्चरेति पाठः।
यल्लोकेति। तद्धित इष्टलोके इत्यर्थः। हेतुगर्भमिदं विशेषणं। न्यायेनैवेति। एकदेशविकृतमनन्यवदितिन्या
तएव भाष्ये मन्यते। एकदेशविकृतस्यानन्यत्वात्सिद्धमिति। एवेनादेशग्रहणव्यवच्छेदः। नन्वस्या वर्तू
नमुक्तं भाष्ये तु आस्त्रीयन्यायाशयतया पि तु योजमतमाह। तदुक्तमिति। विकृतेति। इकारोक्तः
शिष्टनिर्दिश्य इत्यर्थः। एतदेवेति। लोक [illegible] एवेत्यर्थः। एतेनार्थं न्यायोपि स्थानवत्त्वी निर्दिष्ट

नत्स्त्रीमूलत्वेऽपि स्येनोक्तभाष्यासंगत्यापत्तेः। भवत्येवेति। एवं चैकदेशविकृतात्पदबोधकः। अन्यथान्या
दप्रतिपादने पुरुकरीत्यार्थबोधकत्वेनार्थस्याव्यवस्थितत्वं न स्यादिति तात्पर्यं। अत एवेति। लोकसिद्ध
वादिवेत्यर्थः। तत्रोभयोरभावादिति भावः। रोगश्चेति। अपिनाकार्यसमुच्चयः। अग्निमा विना शास्त्री
न्यायाश्रयणे मानांतरमप्याह। अत एवेति। तत्र इत्येवंस्येति संबंधसामान्ये षष्ठी न तु स्थानषष्ठी
र्वसंबंधित्वेनेति। अत एवेत्यस्यार्थं सूचयन्नाह। एतदिति। एवं तर्हि चेत्रो भयासंगतिः स्पष्टैव।
शास्त्रीयन्यायेन यथा निर्वाहस्तथा ऽन्यत्र स्पष्टं। एतदेव ध्वनयन्नन्यदपि तत्र मानमाह। अंतादीति। उक्तमि
त्यत्राग्निमस्यान्वयः। पूर्वांतवत्त्वेनोकारांतेष्ट्वपदत्वादाह। टकेति। इदं च तत्र पूर्वांतवत्त्वफलकथनावसरे उक्तं।
नन्वेवं शाष्ठानित्यत्वापत्तिरत आह। शपूर्वानामिति। रिखागवयादिनिष्ठलांगुलादेर्वास्तव पश्वलक्षणत्वेऽपि यथात
द्बोधकत्वं तथा प्रक्रियादशायां क्रियमाणविकारस्य तदलक्षणत्वेऽपि पारमार्थिकनित्यतद्बोधकत्वमिति भावः।
नन्वनन्यवदित्यस्यानन्यभिन्नवदित्यर्थे ऽसंभवो वैयर्थ्यं वा स्यादत आह। अनन्येति। नञेव मन्यसादृश्यनिषेधे
अन्यत्वसत्त्वादंशस्य दोषस्तदवस्थ एवात आह। तत्रेति। एकदेशविकृतेऽत्यर्थः। न्यत्वाभावः। अन्यत्वनिषेधः। फलिता
न्यत्वाभावादेव विकृतात्पदबोधः। अन्यथा शक्ततावच्छेदकानुपूर्वीज्ञानात्तद्बोधो न स्यादिति मेऽदं पाणीयं स्पष्टं।
प्रकृताश्रयेनार्थः स्यान्यथा त्वइति न्यायमूलमाह। जातीति। दोषांतरमाह। किंचेति। परिमाणेति। आनुपू
र्वीविशेषइत्यर्थः। परिमाणेति। परिच्छेदकमात्रेत्यर्थः। अत एव द्रोणादिवत्सेरव्यायामपि भाष्ये इत्यंततत्त्वेनोक्ते

६५

शि

६५

[illegible]भावेइति। तत्र हि पंचद्रोणादिदृष्टांतेन सर्वकादौ जातिव्यंजकरूपोऽवयवदर्शनस्य सत्वेपि सर्वाद्यानुपूर्वी विशेषोपादानेनक्रि
यमाण [illegible] सर्वनामसंज्ञायास्तत्र तत्र तदंतयोरभावेनाभावमाशंक्य तदेकदेशाभूतं तद्गुणेनेति परिभाषयासमाहितं। य
दि तत्र तच्च द्वित्रिस्त्र्यधिकगद्यादि सर्वेऽपि पुनः श्वत्वव एकत्वाधिकस्य सर्वकस्य सर्वशब्दत्वमक्षतमेवेति भाष्यासंगतिरतस्त
थेति तदाकूतमिति भावः। तदभावादिति। प्रकृतइत्यादिशास्त्रव्यापारभावेन तिङ्त्वासंभवादित्यर्थः। समसंग्रहायाह। नन्व
नेति। विशेषांतरं वक्तुं शंकते। नन्वेति। अंतादिवच्चेति सूत्रं स्थानिवत्सूत्रेण गतार्थमिति मतेन पूर्वसंगतिमाह। स्थानी
ति। एकः पूर्वपरयोरिति दत्रापि स्थान्यादेशभावइत्यादेशग्रहणेन तद्वदत्रापि सइति भावः। अत्रापि नास्त्वित्थं। वस्तुतो नानेन
तस्य गतार्थत्वमिति तस्यैव विषयो नास्य। किंच। पूर्वपरयोरिति द्विवचनन निर्देशान प्रत्येकमुभयोः स्थानित्वेपि प्रत्य
यत्वस्य तत्स्थानिवत्वोध्यमेवं आनुमानिकस्थान्यादेशभावकल्पनेपि प्रत्येकं तयोः समुदाययोः स्थानित्वेमाना
४६ भावेनान्यत्र दोषापत्तेश्च तथात्वं दुर्वचत्वात्। तस्य स्थानिवत्त्वेन प्रत्ययत्वमिति सेनाल्वत्त्वित्यादि नीतिबोध्यं। यद्यपि [illegible]ते
एकदेशोति न्यायेन यस्माद्विहितस्तत्वं तथा विशास्त्रीयकार्यभावेन परादिवत्वेनानित्यस्य प्रत्ययत्वम प्रत्ययइति
पर्युदासे [illegible] प्रसिद्धदोषापत्तेः। नन्व प्रत्ययत्वावच्छिन्नप्रतियोगिताकभेदवत्त्वं दुर्वचमिति तत्त्वं। प्रातिपदिकत्वा
नात्राभावातिदेशाभावे नन्व तत्र स्थानिवत्त्वस्य दुर्वचत्वात्। किंच विरोधाभावेनातिदिश्यमानधर्म
दुर्निरूपः। अन्यथा ब्राह्मणवत्वातिदिष्टक्षत्रियस्य ब्राह्मणत्वानापत्तेः। इत्याशयेनाह। स्वतइति।
तत्कुकरीत्या पदत्वान्नलोपापाद्यरिति भावः। स्वाश्रयेति। आदेशानिष्ठप्यमे प्रयुक्तकार्यभावांगी

अत एव ब्राह्मणवदित्यादौ तद्धि रूढ्या प्रयुक्तमद्यपानादिनिवृत्तिर्न पुनर्मुख्यादिः। उक्तमेव विशदयति।
अत एवेति उक्तार्थस्य तत्स्वभावसिद्धत्वादेवेत्यर्थः। नन्वेवं तदानर्थक्यमत आह। असिद्धेति। वस्तुमेव तत्र वि-
न्यायेनेति। भाष्यायसंमतत्वादाह। तत्त्वादीति। एतेनाप्रामाण्यनि[illegible]रासः। शास्त्रीये पिकर्तव्यौ
शेषात्मत्वं वक्तीत्यर्थः। वाक्यत्वसाप्रातिपदिकत्वाभावस्य शास्त्रबोध्यत्वाभावे पितात्पर्यतः शास्त्रविषयत्वेन शास्त्री-
यत्वमेव। अत एव पर्युदासे प्रतिषिध्योगम्यइतिशास्त्र[illegible]तांमवत्यारइति भावः। तस्यतत्वमाह। विकल्पइ-
ति। हियतः। पूर्वत्वात्। पक्षिसाकल्यम्भ मनिरासायाह। निसेति। आनुमानिकादेशमादायाह। स्थानीति।
वत्वादीत्यनेनास्य चिःस्थिता। तद्दीर्घं तु तत्र न भाष्यानुगतः। अत एवानुविपरिभ्य इति स्त्रेइ वतन्त्र भगवता ता-
पर्युदासप्रसज्यप्रतिषेधयोः फलभेदेन विचारितः। तस्माद्धि पूर्वस्यास्य तिङ्प्रयोगः। स एवोवा प्रयोगइत्यत-
देशद्धदि निष्याथाह। तस्येति। उक्तहितोरेव तुः। पक्षिमस्य मगानित्यादिनिर्दिष्टानां सोत्रत्वेनोपपत्तेराह। तस्ये-
ति। एतेनाधीत्यादिविधिवर्णनेन फलितं अ[illegible]याच्यभावस्याविशास्त्रतात्पर्यविषयत्वेन तस्याविशास्त्रीयत्वात्त्वावनइ-
त्यादिनिर्दिष्टासंगतिरिति परास्तम्। पर्युदासस्थले एव तत्त्वांगीकारात्। कोस्त्वाभावादिमतमुक्तार्थस्यस्वार-
सिकत्वेन न त्वापकाद्यपेक्षेति लाघववा[illegible]दाह। केचिदिति। भाष्यइति। उक्तमित्यत्रान्वयः। तेन। लोकन्यायेनैव प्रा-
गुक्तेन। एवं चात्रैतेन सिद्धो वर्णकश्चिदिति। प्रागुक्तइत्यर्थः। अनाश्रयणस्थलमाह। नपदंतेइति। इत्युदेति। यत्तो [illegible]
पस्येति भावः। भवः क्षत्रियकं दूतिरितु दाहरणसमन्वायकः। तत्र हि वरउक्तत्वेन स्यादित्यत्रान्वयः। कं दूषयेत्ये [illegible]

गं तात्पर्यं ताद्दृक् । तत्रेति । तस्मिन् परतद्रूपे सति । आदेशोपि तन्निषेधेन यलोपे चेत्स्यपि बोध्यं । क्रमेणेति । अत्र च पूर्वे
शिष्या निवर्त्यादकारेण व्यवधानादिति विशेषः । तथा च वलोपस्यापि तत्र एव प्राप्त्याह । लिचेति दीर्घीकं द्रूवू तिःकं
द्रू तिरि ति वा स्यादिति भावः । अत्रारु चिबीडं तुर्सं रूप मिति स्य प्रसार त्यात् तेन तथा दुर्वंवं । तदति देशेन पहं
वेति स्त्रा सिरि क्ले फला भावश्च । तस्य तन्मात्र विषयकत्वेनासार्वत्रिकत्वं च । अत एवान्यत्रातिप्रसक्तिरूपी
ति बोध्यं । प्रागुक्तार्थं द्रढयति । अत एवेति । तत्रातिदेशप्रवर्तनादेवेत्यर्थः । अन्यथा सेप्रेत्यप्रतिषेधेवा
क्येतदसंगतिः स्पष्टैव । अस्याग्रेण्यन्वयः । अत एव वः । अन्यथा तावत्स यैतथा वनासंगतिः स्पष्टैव । एवं
तस्य तत्त्वभावसिद्धत्वे भाष्यमपि मानमित्याह । क्षियइति । तत्र हीत्यस्योक्तमित्यत्रान्वयः । देशे । स्वीक्रिय
माणे सति । कानां । शब्दानां । विहत्तेरिति । अन्यार्थमिति विशेषः । स्फुटं । स्फुटतरं । अत एवास्याग्रे उद्धृते रवः ।

गड़े नन्वेवं सत्युदितो रित्यत्र प[…]र्युदासेपि प्रोक्तरीत्या ८ मा[…]मा प्राप्तो सि सत्यतीत्यादौ तदाशंकानवकाश
स्याज्ञानिनकृतत्वे व्यन्यथासिद्धंतो किर युक्तैवात आह । नत्विति । कुत इतीति सन्निह सर्पः । अपि विरोधे ।
[…]रेवाह । प्रसज्येति । तस्य प्रसिद्धत्वेन सिद्धांतत्वस्तवनायाह । वार्त्तिकेति । एवं च तदप्यज्ञान
[…]तेति भावः । नन्वनत्रुइत्युक्त्यैव संबंध सामान्य षष्ठ्या समासचतुष्टय फललाभे विधिर्व्यग्र
[…]आह । अन तिष्ठयार्विरीति । उत्तरपदलोपि समासांगीकारादि विशेषः । अलाश्रयेइत्यत्र

त्रेइत्यर्थः। तेनतद्वारासकलात्रविधिपरिग्रहइतिप्रधानन्यायबाधांगीकारेणयथाकथं
ञ्चतस्यापिलाभस्तदाह। तेनेति। विशेष्यतयाश्रयणप्रकारमुक्त्वा विशेषणतयाश्रयणप्रका
रेति। आदिनातदादावित्यादिपरिग्रहः। तथाचेतिपाठः वेतिपाठेवासमुच्चये। उद्देशात्रे
[illegible]रणान्याह। एकोरस्किनेति। आतिदिश्यमानेति। प्रागुक्तरीत्यासकारे स्वतोऽभिन्नत्वात्कथंणत्व
६ प्राप्तिर्निषेधादितिशंकानेतिभावः। युवंत्याभिति। अत्रसूत्रे विशेषातिर्देशस्यापिवक्ष्यमाणत्वान्नदोष
इतिभावः। कइष्टइति। यद्यपीदं रूपंस्यान्निवसेनोखेगुणेत्थादिशेपाक्षिकलोपेनसिध्यतितथापिपक्षेक
विकइतिस्यात्कयिष्टइतिसिध्यतेइतिभावः। अपेति। अत्रवलादिलक्षणइण्नदेवाःसंतीत्यत्रैवनात्रान्वेते
नस्यानितेतिसूचनायाह। दीर्घेति। अन्यथा। ऋष्टत इत्यस्याभावे। विधिग्रहणंविनिगमनाविरहादि
शेषातिदेशमपिबोधयतीत्याह। अत्रसूत्रेइति। नान्यत्रतन्न्यायादितिभावः। अपिनासामान्यातिदे
शासमुच्चयः। अन्यथेति। तदनंगीकारेइत्यर्थः। यतइत्यादिः। अपिनातच्छून्यपरिग्रहः। मान्यायनुरोधे
नाह। उपस्थितेति। उपस्थितसामान्यधर्मेत्यर्थः। तज्ज्ञापकेति। तदाक्षिप्तज्ञापकसामान्यधर्मेश्चे
त्य[illegible]र्पातिदेशेतत्संभवे। अन्यथातुतस्याप्यतिदेशइतिबोध्यं। देशेनइति। न्यायेनसामान्योपस्था क्रि॰
पकसामग्रीकालेनियमेनविशेषोपस्थापकसामग्र्यभावोत्थस्यबीजमितितत्त्वं। तथा। तथापिप्रधान ६७

न्यायबाधेनेति भावः। तस्योक्तरीत्यासिद्धिरित्याह। स्थानलइत्येवेति। नत्वपीति लिंगात्सन्न्यायोऽनित्यः। तेनात्र विशेषणमिति द
र्शितमित्याह। इत्यादीति। प्रदायेत्यादाविन्त्यादिः। किंत्वं हि क्त्वाविशेषधर्मः। सेटू क्त्वस्तदभावात्। नन्वेवमप्येवं विध्विग्रहणसा
फल्येऽनुबंधकार्येऽप्यनल्विधावितिनिषेधः स्यादिन्त्येन किसीत्यादिना सर्वत्र विशेषणतयाश्रयणात्। तथा च तत्र स्था
नित्वाप्रवृत्त्योः त्वाप्राप्त्या नल्वपीति व्यर्थमेवातआह। अनुबंधेति। तदुक्तं वैलक्षण्ये। यत्तु तेन तत्र तदप्रवृत्तेरपि ज्ञापनान्नोद्
लक्षण्यं। किंच। अनुबंधानामनेकाल्त्वे ठरंगत्वादिसंज्ञाविहितसंज्ञादिनाऽपरिहारात्तदप्रवृत्तिः। अनेकाल्त्वे तु दोषसं
भावनैवाद्येनेति कैयटदंडिकघमकौस्तुभरत्नाकरादयः। तन्न। सानुबंधकनिर्देशे पक्षद्वयेपि तद्रहितस्य न स्थानि
ता किंतु समुदितस्येत्यर्थस्यान्यत्र प्रतिपादितत्वेन तथोक्तेर्दुर्वचत्वात्। स्येति ज्ञापकत्वेन वक्ष्यमाणरीत्या साफल्या
न८ त्। तथोक्तेरनन्यगतिकत्वाच्च। तस्यैतत्वस्य तत्र भाष्यानुक्तत्वाच्च। वक्ष्यमाणज्ञापकेनैकार्थज्ञापनेनैव। नयसिद्धिरि
ति ततो गौरवाच्च। तदेतद्ध्वनयन्नाह। अनुबंधानामनेकाल्त्वेपीति। अपिना सिद्धांतमतेकाल्त्वपरिग्रहः। य
यास्थानित्वात्स्त्रीपत्रितपादिशतापीति शिद्ग्रहणं व्यर्थमनेकाल्त्वेनैव सिद्धेरित्यर्थः स्य प्रागुक्तत्वेन तदाशये
नाह। [illegible] षां। अनुबंधानां। नन्वेवं भाष्यविरोधोऽत आह। नानुबंधेति। शिद्ग्रहणेनेत्यादिः। एतेन प्रागु
पपरिहृतः। तत्र निषेधाप्रवृत्तौ भाष्याभिमतत्वमाह। अनित्यमिति। तत्र तदप्रवर्त्तनमित्य
त्वेकवचनं। द्विवचनादिति। हसौ पंचमीत्येतेनेत्यर्थः। आदेशोऽइति। तस्यादेश इत्यर्थः। एवमग्रेपि।
भावाच्चेत्यपि बोध्यं। अनुबंधेति। स्थानिवत्वेनानुबंधप्रयुक्तकार्याभावज्ञापकत्वमित्यर्थः। उक्ते
वित्यर्थः। बहुवचनेन प्रयोजनाभावस्य हेरपि ङित्वे यथा स्यात् तातङोऽङित्वे यथा स्यादिति ङित्त्वे

६८ ...एवेन तेषां तरनिरासः। दूषितं चेति। उक्तं ज्ञापकमिति शेषः। ध्वनितत्वमुपपादयति। अन्यथेति। तत्र तद
...द सर्पिः। तत्रेति। दृष्ट्वादीत्यर्थः। नन्वेतानि ज्ञापकानि वार्त्तिककृदुक्तानि न सिद्धान्तभाष्याभिमतानि
...वद्धयो दूषितत्वादसाधारणफलाभावाच्च। आद्ये यद्यपि तन्नैत्रं दूषितं। अत एव तावन्मात्रमेवप्राग
के त... त्तीये सिद्धान्तस्तेनावश्यकेन न वरमोक्तिन पिच्च ङिन्वेत्यादिना दूषितमेवेति यासुटो ङित्वं पि द्विसा
वकारामिति तस्य न ज्ञापकं पेता। गाङ्को ङिद्वेशानवः शित्वं च भाष्ये एव तत्र प्रसारणमिति तयोरपि न ज्ञापकत्वे से
कदेशस्तु क्तिवेन तदसंगतिनी निष्ठा तस्माह। विबाधेति। तेषां तदनिष्टत्वेन तु तदसिद्धि दोषेण तत्त्वं ङनासंगतिः स्य
द्वेवेति भगवतस्तथापि मतमिति भावः। आदिनोक्तसर्वपरिग्रहः। स्थानिपदलभ्यत्वे गौरवादाह। आ
देशेति। गुणानामिति न्यायेन तदभावमाह। तदन्वितेति। तद्योगे तस्यादेवसंभवादिति भावः। उक्तेहेतौ रे
वतस्मिन्निती त्यस्य प्रवृत्त्यासत्तिः सप्तमी। तेनासिद्धत्वाच्चेति न्यायेन तस्याज्ञापकत्वाधीकत्वेन ज्ञापकत्वस्य संबे
धं विनानुपपत्त्या विधिशास्त्रकृत निमित्तत्वमादाय पर्यवसानेनवानिमित्तत्वं फलतीत्याशयेनाह। परेति।
आदिसगाख्याज्ञादेशाद्यस्यार्थी सर्वं वाक्यमिति न्यायेनाह। अच एवेति। एवेनाज्ञत्त्वादेशव्यावृत्तिस्तत्फलमा
हातेनेति। पूर्वसूत्रतो विशेषमाह। अत्रेति। ननु तथापि स्योक्तफलसत्वे पि तत्रैव किं मानमत आह। अत एवे
दे३ ति। उक्तार्थं गीकारीवेत्यर्थः। निर्हासे कर्त्तव्ये एकस्य णिचो निमित्तत्वादाह। पंताद्रिति। निषेधइति। किन्तु
जितिवार्त्तिकोक्तइत्यर्थः। मलोपस्येति। वाल्यपीतेत्यादिस्थाश्रयनिरन्तरस्यत्रेष्टस्यादिति भावः। ननु युवजानि णिच
रित्यत्र न नु यलोपे निषेध्याभ्यकारान्तरे ... पादस्यैव पादावस्थेति। बहुव्रीहौ पादस्य लोपे इति

भाष्ये १

पदस्तिलोपे गत्वेदित्वाद्यत्रिपादः पदितिपक्षाभावे नैच्चा। पाणि[illegible]स्यैव। अत्र तस्य स्थानिवत्त्वाभावान्न स्यात् इदमेवाग्रे आदि
संग्राह्यं। अत्रेति। णोणीमुख्यावेति भाष्योक्तेः। नहि त्रिपुत्रो द्विपुत्रव्यपदेशं लभत इति भावः। उगित इति। इतश्चानिग्न इ
तीत्यादिः। अनापूर्त्तिरिति पाठः। आनापत्तेरिति ठः पाठः प्रागस्योऽन्यः। नन्वेवमपि विध्यग्रहणं व्यर्थं पूर्वस्येत्युक्त्यैव
कार्येऽस्य स्याल्लक्षणेऽपि निर्वाहादिति चेन्न। पञ्चमीसमासार्थं वक्ष्यमाणफलद्वयार्थं च तद्भावश्यकत्वात्। तदाह। दिगिति।
अत्र। प्रकृतसूत्रे। अतिदेशोऽन्वयः। ननु यल्लोपादिहणाज्ञापकाद्यपि हैवाक्यशेषाध्याहारेण स्यान्नियमं विभावा
भावोयातिदेशांगीकारेऽपि कथमादेशप्रयुक्तवारणमत आह। स्थानीति। आदादेशोऽद्ववत्कार्यं लभते भे न लभते त्वे
तिवाच्यार्थः। नश्वर्थे। नन्वेवं कथमत्से निर्वाहः। वृद्धिलोपानिमित्तकत्वादत आह। लघूपधत्वेति। ह्रस्वाकारोपधत्वे
त्यर्थः। ननु परस्मिन्नित्यस्यापि सूत्रे श्रवणमत आह। व्याख्येति। किरतीत्यत्र न इत्यादि निर्देशात् लकादित्यर्थः।
अन्यथा निमित्तत्सुडपेक्षया पूर्वस्य गुणस्य स्थानिवत्त्वादादेशो न स्यादिति भावः। पूर्वत्वमुपलक्षणं न तु विशेषणमि
ति तात्पर्यं। विधिग्रहणफलमाह। पूर्वेति। संबन्धसामान्ये षष्ठी। गुणानामिति न्यायेन तदसम्बन्धः। अत एवाश्रा
[illegible] एकदेशेति न्यायेन सांतस्य सुम्नि रूपितांगत्वात्कर्मणि किमस्य पद इति भावः। तस्यैव फलांतरमा
[illegible]मिति। बोद्धुः श्रोतुश्चार्थ इत्यर्थः। विध्यान निरासायाह। भावइति। भावार्थमाह। तदिति। अस्य
[illegible]। द्वितीयार्थो ङीकारादेवेत्यर्थः। एवमग्रेऽपि। पञ्चम्यन्तार्थः प्रतिबन्धेऽन्वेति। उक्तार्थे सफलेमा
[illegible] पञ्चेमितीति। सास्यदेवतेत्यण् द्विगोर्लुगनपत्ये इति तद्धितलुकि लुक्तद्धिते ति ङीपो लुक् तस्य
[illegible]प्रोनिरस्ति प्रतिबन्धे [illegible] इति भावः। लुकिनेति। लुगिति वार्त्तिकव्या

६९

...वः। अन्यथा। उक्तौ श्रीकारि। तत्र। पंचेंद्रे सत्र। स्पष्टं गमकांतरमाह। प्रकृतेति। उक्तमित्यत्रान्वयः। आदि
...वेबंधवक्षेत्स्वविध्यो स्यानिवद्भावप्रयोजनानामायनादीनां साध्यनार्थमिदमुक्तं। तत्र न। निषेधे ए
...द्विरसप्याश्रुतके यदा सौगतसंध्यन यनुप्रागुक्तेन्द्र नरयाप्रासताख्य विरोधं परिहरति। तत्रेति।
भाष्य...र्थः। एतेन प्रथमाधी मात्र प्रतिपादकरनाकरादिग्रंथाः परासाः। मानाभावादिति। अनुवादत्वात्स
न्नियोगशिष्टत्वाच्च तस्मादित्सव्यवच्यानांशाप्रवृत्तेरितिभावः। नन्वनुवादेपि परिभाषाप्रवृत्तिस्वीकारादुक्तरीत्या
विकल्पाव्यवच्यानीशस्यान्यत्र प्रवृत्तिस्वीकारेदमयुक्तमतआह। स्वरे इति। इतीति। इत्यादिरित्यर्थः। द्वित्वा
प्रमायाह। प्रकृतिवेति। सुप्युपास्य इत्याह वित्यर्थः। सप्रसङ्गप्रतिषेधइति प्रागुक्तमेव। नस्त्रथे। नपदांताज
न्यत्रद्विर्वचनसवर्णादिग्रहणंव्यर्थं तेषां त्रिपादीस्थत्वेन तत्रकार्ये स्थानिवत्त्वस्यैवाप्रसक्तेरसिद्धत्वात्। ततः सूत्र
रीत्याशस्ह। अत्रेति। पदांतत्वरियलोपस्वरग्रहणस्यात्रैपादिकत्वेनावश्यकत्वादाह। द्विर्वचनेति। गाङ्कुटे
त्यादिनिरासायाह। वतीति। प्रकृते निषेध्यसत्वादाह। भातीति। अवः परस्मिन्नित्यर्थः। त्रयाणांकमेधारये।
न्यूष अपि नात दन्यस मुख्यः। अन्वयेन। अंतादिवदित्यादिवत्। प्रथम सूत्रस्यापि संग्रहइत्यध्यन यन्नाह। तिनेति।
यथावेतत्रथामनोरमादौ स्पष्टं। आदिनारामभित्यादावनुस्वारादेरमीदीर्घपेणेत्वादानास्त्वणत्वादेश्च परिग्र
हः। ननु विधिशब्दःकर्मसाधनश्चेव बहुव्यास समासइत्येवास्थितिर्वेत्याः। द्विर्वचनादिभिरनन्यमापत्तेस्त इतनुरोधा
त्कर्मधारयेविविधिशब्दस्य पूर्वनिपातापत्तेः। पदांतेत्यत्र दोषापत्तेश्च। एकेन विधिशब्देनसमासद्वयासंभवाच्च। भ्रिवः
वेस्तू व्यापत्तेश्च। तस्यासिद्धेश्च। तद्धनं...त्रेति। तरं तानां द्वंद्वेन द्वंद्वांते इतिन्यायेन विधिशब्दस्य प्रत्ये ६९

कं संबंध्याह। कर्मेति। मनोरमायां संगत्यं ध्वनयन् लक्ष्यसिद्धिमाह। नेयइति। स्पष्टार्थमाह। इणइति। यन्तीति
भावः। तत्र लोपे कार्ये यण इणो य[illegible]ति विहितस्य। तथा चाहल्परत्वान्न लोप इति भावः। आदिनाऽऽदैवोश्वः राजानो
यन्तीत्यादिपरिग्रहः। नन्वत्र पदसंस्कारपक्षे रनादिष्टादचः पूर्वत्वेनादृष्टत्वात्स्थानिवत्त्वस्यैवाप्राप्तिरिति कथमि
दं तथा रब्धेमोन फलमिति चेन्न। वाक्यादपोद्धृत्य पदानि संस्क्रियन्ते इति पक्षे तत्र सं[illegible]स्कारात्। न हि पदान्तरमन
पेक्ष्यमेव पदमिह शास्त्रे संस्क्रियते इति नियमः। युष्मद्युष्मदि इत्यादि संग्रहापत्तेः। अस्त एवोच्चरितप्रयो
गः। अन्यथा विसर्गोच्चरितप्रयोगापत्तेः। आकृतेति तु नास्त्येव। तदेतद्ध्वनयन्नाह। पूर्वे येति। इदं च पदान्तरभावयव
प्रतिबन्धकस्थानिवद्भाव[illegible]निषेधोदाहरणं। अन्यथा तु यथात्र न निर्वाहस्तथास्पष्टं भावप्रकाशे। ताभ्यां इ
ति। प्रकृतसूत्रस्थ एवेति भावः। सिद्धान्तमाह। अत्रेति। तथा च पदे परतश्च रभावयवस्य पदसंबन्धि न एव
प्रत्यासत्या ग्रहणेन पदचरमावयवकर्मकविध्यौ कर्तव्येऽचीत्यपरस्य ह्यादेशो न स्थानिवदिति पर्यवसितम्। तत्र
पक्षेऽपि [illegible]तदेकवाक्यतया पक्षी तत्पुरुषपक्षेऽपि तथैव बोध्यं। तदाह। तेनेति। अन्यथान्तर्वर्तिविभ[illegible]क्ति
माश्रित्य पदत्वात् दुर्वचं स्यात्। स्थानिवत्त्वं तु न। तत्पक्षे निषेधात्। तथा च कानि सन्तीत्यादावेव पदान्तविध्या विसस्यो
दाहरणं नेदृशानीति गूढाकूतं। सोवमपि। उक्तार्थे नोक्तनिषेधाप्रवृत्त्या वपि। यद्यपि पूर्वत्रासिद्धेनेत्यस्य वार्ति
[illegible]तत्वदपि भाष्यमते[illegible] शास्त्रपरमित्याशयेनाह। पूर्वत्रासिद्धीयमिति। तथा च भगवता उक्तप्रत्यास
[illegible]ति भावः। अत एव समाधत्ते। पदेत इति। तत्र। वेतस्वानित्यादो उक्तार्थे नेवाह। पूर्वत्रासिद्धइति।

८०

कृता माह। तत्रैवेति। उक्तरीत्याऽष्टलौ ऊङ्शोतेङ्स्य स्यात्र प्राप्तिरिदानीं तस्याः प्राप्तिरस्यत्तु प्राप्तवत्युंषय
ति। स्यानिवत्त्वाऊङ्घ्रिने ति भावः। नत्रैव मपि ऊङ्श्र विध्यापेति निषेधात् पूर्वी इत्येवेति ऊङ्श्र स्यादेवास
ति। प्रहृते साऽस्विर संज्ञीति। अत्र सूत्रे सान्निध्यपाठेन यस्य च रविधिसान्निध्यं तस्यैव ग्रहणमि
त्यष्टलौ ऊङ्शोतेङ्स्य स्याग्रहणमिति भावः। कोस्त्वाभावुस्यसांगत्यं ध्वनयन्नाह। कारकेति। सुबुक्ते स्वैर्वं
समासेऽप्सुबं तत्त्वेनोत्तरस्यापदत्वाऊञिवेत्यादावद्व्रोपस्य स्थानिवत्त्वेनाविऊाप्रतेरत आह। गौवेत्यादावित्ति।
नदोषइत्यत्रान्वयः। नन्वेव मप्यलुक्ल मुत्तरपदत्वेन्वेति प्रसयलक्षण प्रतिषेधेन तस्यापदत्वस्यत्वस्वत्वा
७ त्स्माऽदोह। उत्तरपदेति। तस्य नित्यत्वेत्याह। पदेइति। सप्तमीसमासेइति भावः। अत्रेदमिति। अण्वात्राधेसप्त
मीसमासपरं प्रागुक्तमपीत्यर्थः। अपि नाप्राप्तुक्त युक्तिः समुच्चयः। सिद्धान्तं तरमाह। अत्रेति। साध्वा
मीसमासपरं प्रागुक्तमपीत्यर्थः। अपिना प्रागुक्तयुक्तिसमुच्चयः। सिद्धान्तान्तरमाह। अत्रेति। सात्स्वा
रं पर यावेति घोषः। आदिना द्विर्वचनादिपरिग्रहः। प्रतीति। तदिः। तत्राद्यस्योदाहरणं। कानीत्यादि।
द्वितीयस्य तु प्राप्तस्मेभ्वा। प्रागवदाह। तदिति। भाव्येरिति। द्वितीयस्तीयाऽत्वप्रत इत्यत्रान्वयः। यद्यपि
भाव्येवरेयलोपस्वरऊर्वेत्यिष्ववोक्तत्वापि दीर्घोपि तत्रोपलक्षणत्वेन बोध्य तइन्यत्र प्रतिपादितमित्या
शेषेनाह। दिर्घीति। प्रत्येति। भगवतेत्यादिः। यद्यप्यवः परेति इष्यात्रिपाद्यामसिद्धत्वान्न तस्याप्युपयोग
स्तथापि तत्र पक्षे न्यायसिद्धानुवादः। प्रागुक्तफल सिध्यर्थमिति बोध्यं। मूलस्थेति नास्त्र परामर्शो पित
त्रकेन निषेध इत्याशंकायामाह। त्रेति। ननु दर्ववकृतः प्रश्नहतमास्मिना

८०

दित्या

न्यस्यापि प्रसंगादत आह। स्थानत इति। स्थाने इति। स्थानेंतरतमइत्यतः तदाह। तदेवलितमाह। ल्यब् लोपे इत्यादिसंग्रहाया
ह। अर्थ इति। लक्ष्यभेदेन विकल्पः। ननु करीत्यादिशब्दस्यैव प्रसंगलाभेन तस्य चाक्षुषत्वस्य बाधितत्वेन कथं तद्दर्शी
नस्य संज्ञात्वं अत आह। अत्रेति। तथा च तस्य ज्ञानसामान्याभावो लोप इति फलितं। अत एव ल्यबं तपदस्याध्याहारवि
षये ल्यबू लोप इत्यस्य न प्रवृत्तिः। ननु एवं लोपविधिना तस्य तदभावो बोध्यनीयः स च बाधित इत्यत आह। तत्रेति। लो
पविध्यायकं इत्यर्थः। तत्र शब्दज्ञानस्य श्रावणस्यैव प्रसिद्धत्वादाह। तत्सामेति। तथा च तन्निषेध्यस्य तत्सामग्रीनिषे
धे पर्यवसानं। मानसंस्मरणात्मकं वा तज्ज्ञानं तिष्ठत्येव। अत एव स्मृत एवानुबंध्यः कार्यसाधक इति ग्रंथकृतां व्य
वहारः। एतेन श्रवणस्य श्रोत्रव्यापारत्वेन तस्यैव तत्र निषेध्यत्वस्यान्यप्रयोक्तृव्यापारस्योच्चारणस्येति दं प्युक्तम
पास्तमिति भावः। नन्वेवं शब्दनित्यतापत्तिर्युक्तं तमिति न्यायेन जातानित्यताशास्त्रप्रामाण्यापत्तेश्चात आह। त
त्रेति। उक्तोर्थः। प्रत्ययलोपे इत्यस्य प्रत्ययलक्षणार्थमित्यत्रान्वयः। सकललक्ष्याणि प्रायः संग्रहणीयः। एवं न जातनित्य
त्वव्यवच्छेदः। अवयवलोपशास्त्रैरर्पितत्वदवयवरहितस्यैव तत्र द्विषये प्रत्ययत्वाद्बोध्यतः इति भावः। न जिदमकृत्वं

२।६४ स्वं रूपमिति वचनाच्छब्दस्य संज्ञा प्रसंगेन तदर्थस्याप्रसंगो [illegible]। अर्थस्यैवेति। महासंज्ञाकरणसामर्थ्यात्। लोपनं
लोप इति हितदर्थः। न हि शब्दो लोपनक्रियेति के यटादयः। वस्तुतस्तु प्रसक्तादर्शनस्येत्यर्थे लोभार्थे स्थाने पद
[illegible]न वेतीत्यत इति शब्दस्याप्यनुवृत्तिः सूत्रभेति तथा भाष्योक्तमेव [illegible] युक्तं। लुक्श्लुलुप इति धात्वर्थानुसारे
[illegible]वासंभवादिति बोध्यं। किंच। स्वं रूपमित्यस्य प्रत्याख्यानेतदननुवृत्तावपि यत्रार्थकार्यबाधस्तत्र तच्छब्दस्याह

क्रमीदीनामर्थे संज्ञात्वं लक्ष्यानुसारिव्याख्यानेन सर्वेष्टसिद्धिः। तदाह। व्याख्यानादिति। कौस्तुभायुक्तिं
। द्विति। ग्रामाधिकरणिकास्थितिरिति तदर्थः। पत्रिरिति पाठः। पत्रैरिति पाठे प्राग्वद्बोध्यं। वास्त
...तातुनापत्रिरित्याह। वास्त्रेति। चः समुच्चये। तेन। ल्यब्लोपे इति वार्त्तिकेन। एवमग्रेऽपि। तदर्थानिरूपि
ताधिकरणत्वे विशिष्टपत्रिः पञ्चम्या इत्याह। तत्रेति। एवं च तेनापि न वारणमिति भावः। ननु किं तु स्यमस्तु हाह
रणमतमाह। तस्मादिति। तस्यायुक्तत्वादित्यर्थः। तदाभावे द्विविशेषणः। ननु पित्रकृताप्रकरणेऽपि णापितुको वा
रणमतमाह। कादिति। निष्कृष्टं दोषमाह। अत्रैवेति। यद्यपि पक्षद्वयस्यापि भाष्यारूढत्वं तथापि तत्रैव किं
मानमित्याशंकायामाह। तिनीति। कौस्तुभरत्नाकरौ युक्तिं खण्डयति। द्वित्वस्येति। पक्षद्वयेऽपि तत्र तत्प्रवृत्ते
र्भाष्यसिद्धान्तादिति भावः। अत्र मानान्तरमप्याह। अत एवेति। मयपरस्य यणो द्वित्वे इति भावः। पुनर्द्वित्वस्य
कथमप्राप्ते मनोरमादौ प्रतिपादितत्वे न रत्नाकरदं ग्यादिग्रन्थासंगतिरिति ध्वनयन्नाह। तेन क्षि
गींदीति। आदिना स परिग्रहः। नन्वेकस्य जश्त्वेन दकारे प्रयोगेन द्वित्वमतमाह। द्वित्वमिति। तथा तौ
तद्दर्विकं प्रयोजकत्वमिति भावः। द्वित्वमित्यग्रिमप्रतीकमिति स्वरूपवयन्भाकस्याद् इति। यतो रत इति विशेषणः। य
एकस्या आवृत्तेः स्वरूपस्य प्रयोगश्चरितकृतोऽर्तो द्वितीयस्यास्तृतीयस्याश्चनेत्यर्थः। चश्चतुर्थ्यादिसमुच्चाय
कः। अत्र मानमाह। तच्चेति। तत्र द्विरूपाभावे अन्यतरप्रयोगमात्रं स्यान्न त्वासंहत साम्यपेव सिद्धं तिताप्त
र्यो। कैयटेनास्य वेदप्रसिद्धत्वमपि ... विषयशास्त्र विधेयसाध्यनानिकत्वे एवार्थः। अत

७१

एवञ्च हिंसार्थैकप्रयोगे तन्मात्रस्य न यत्नोपादानं किंतु तस्य दृष्टानीवाराद्युपादानमेव। तत्र हि साद्गुण्यात्तद्ध्युमेनत
प्रयोगनिर्वाहात्। अन्यथा तु तत्र तद्ध्युपानुदयेन तद्रूपक्रांतक्रियानिर्वाहो न स्यात्। एवं खादिरे बध्नातीत्यादाव
विबोध्यं। भिन्नपदविषयो यं न्यायो नैकपदविषयः। वेदे प्यनेकद्रव्यविषय एव यज्जुहोतीत्येनकै प्रमस्तञ्जुहो
तीमादानामिति निमदृत्यन्ये। अतएव सर्वस्य दुइत्यत्रादोहित्वमिति पक्षे प्रोग्याप्रोढे सत्रयवत्ठत्वयोरप
त्तिरिति भाष्यकारोक्तं दूषणं संगच्छते। सर्वं चेदं प्रयोगवदेनस्य स्वितमिति बोध्यं। इयंश्रीकारमिनीति स्वयन्नाह।
नैकस्येति। परशब्दो न्यार्थः। प्रयोगपदस्वारस्यादिवाह। नार्थिकेति। साभिध्येयानेकविषयत्वे सफला
नेकत्वे चेत्यर्थः। अर्थबोधनार्थं शब्दप्रयोगात्फलार्थं प्रयोगानुष्ठानाच्चेति भावः। वास्तवं न्यायबीजं ध्वन
यन् समाधिं तत्वमाह। तत्रेति। नान्नार्थस्येति। भिन्नाभिध्येयकत्वस्य भिन्नफलकप्रयोगान्यत्वस्य चेत्यर्थः।
अस्ति च तत्र गवां स्वाम्यश्चेषु वेत्युक्ते तत्स्वामी तत्र तिष्ठतीत्यर्थांतरप्रतीतिस्तन्नाशोत्तदुपादानेतहसीतिश्च।
तथा च लोकवेदसिद्धप्रतिपत्तिलाघवमूलको यं न्याय इति तत्त्वं। अतएवालंकारिकादिदृष्टो विषये प्रस
मभंगं दोषमाहुः। नचैवं प्रकृत इति भावः। उक्तार्थमेवाह। तत्रेति। नास्तीति। निवेध्यस्यप्राप्तिपूर्वकत्वा
दच्चइत्यस्यानुवृत्तिर्नोक्ता। नन्वेवं दृत्यस्य संगतिरत आह। तत्रेति। दृत्ताधित्यादिः। अत एव तत्रैवाह। आदिनीति
तएव च। एतेन प्रकृते तस्यैव पाठः सूचितः। उभयत्राश्रयणे दृत्यस्य निष्फलत्वेनासंभवस्य दुर्वचत्वादाह।
आधात्यादीति। एतेन पुत्रादिनीत्यादावुभयत्र इति निवेध्यात्रस्य सरत्वं दुर्लभमिति सपासं। अतएव पुत्रा

लिंगविशिष्टेति प्राप्तौ विनिवेशयोन। तत्रैकरेफमात्रव्यवाये साफल्येनानेकव्यवाये प्रवृत्तेः। नचैत
द्धेति स्थानिवत्त्वेनानेकव्यवायः यस्येति लोपस्य स्थानिवत्त्वस्य तत्रापि तुल्यत्वात्। पूर्वत्रासिद्धेति नि
षेधात्। अतस्तु तदव्यवधानं तु तत्रापि तुल्यमिव। रेफ यकारयोस्तत्र रेफस्येव प्राप्तिरिवृनेतिवोध्यं। ननु
दिनीदंन्यादिभिस्तत्वारमीमांसेत मतस्त्राह। तत्रेति। छंदोव दितीष्टेरिति भावः। भाष्यादौ तथानुक्त्यात्तदु
पगमकाभावादत्रान्यसंमतिमाह। तत्रैवेति। नकेवलं परसंमतस्यैव तथा किंतु पुंक्तितोपीत्याह। इदमेतिस्त्रा
कोश्यमात्रं सत्यत्रापीति भावः। प्रायेणेति शेषः। अतएव तथा भाष्योदाहरणसंगतिः। तदाहेति। तत्सर्वमाह स
र्वेः। पुत्रादिनीति। सुप्यजातावितिणिनिः। एतेनापोरहाभ्यांदुरनचिवत्रादिन्याक्रोशे पुत्रस्येति वाक्येन
त्र ह्योपादौ नेनत्र चटितवाक्यस्यानित्यत्वकल्पने नक्रियामेव प्रवर्त्तते नाम्यत्र। नचैवं वै परीत्यं कुतो न। उ
दाहरणपरभाष्यविरोधापत्तेरिति तत्पात्तो। नत्र चटितमनित्यमित्यस्यासत्वात्। नत्रहृयोपादानं तु स्पष्टा
र्थमिव। यद्यपि प्रकृतसूत्रस्याहत्र्यादित्रोपसंख्यातत्वाद्बवाहतेतिस्त्रियामेव प्रवर्त्तत इति सुवचं तथापि तत्र
तत्साधक युक्तेरत्रापि संभवइत्याशयेनाह। तादृशेति। वार्त्तिकेऽजाद्यवादुक्तरीत्यानतिप्रसंगान्नतथाधि
पुत्रोहतेयदीत्याक्षिवकुर्व्रीहिः। आहितात्र्यादिः। अस्यांगपूर्वपदादिति ङीष्। सांतेत्वे दिति। अनेनपुत्रादिनी
सादेदितिवा भावः स्वचितः। एतेन हतजग्धयोः परतः पुत्रशब्दस्येति नियम इतिदं प्रयुक्तमपास्तं। अदहती
सादीतिवापर्त्तेते। जाद्यवादाह। वाक्रोशेएवेतीति। ननु [illegible] संयुक्तेष्वित्यस्यनानुवृत्त्यादीतिकथं तत्राह।

इदरत्व्येवर्यं जातिपूर्वत्वाभावादेतदप्राप्तेः तेनगौरादिलक्षणकल्पयाङीषुबोध्यः
पुत्रशब्दस्याजातित्वाविवेन

तत्राह। त्रिप्रेति। प्रक्रमादाह। वर्णानामिति। परस्येति। रामार्जुनगत्तिस्तयोरित्तिवदिति भावः। एवम
पि हलामेव ग्रहणा सिध्यत्तदलो। एवा तत्राह। नचेति। नहीत्यर्पेश। अत्र ज्ञाकेपैमप्याह। यत एवेति। सज्ञा
सीयग्रहणादेवेत्सर्पः। अन्यथा तत्सूत्र विषयेवर्णत्रयावध्यकत्वात्सर्वत्र तस्मात्स द्वित्वस्थानेन निषेध्येत दा
नर्थक्यं स्पष्टमेव। नर्त्तनेनापि द्वित्वे विकल्पेन विधीयते सर्वत्रैत्सनेनैवं सिद्धे तदानर्थक्यमेइष्टापत्तिरे
वात्तत्राह। निर्धेति। अन नचिचेत्सत्र विकल्पानन्तु

तु १

वृत्तौ तद्व्याख्यायामाह। सर्वत्रेति। अत एव मनोरमायां तथोक्तं। इदं पूर्वोत्तरस्वस्वप्रवृत्तिदोषपरिहारार्थमिति। ए
तेन तन्मते इतरत्र शाकटायनग्रहणानुवृत्त्यैव सिद्धौ शाकल्यादिग्रहणं व्यर्थमित्यपास्तं। इतीति। सूत्रारम्भ इत्यर्थः।
अकृतत्वादिति। अकृतानुमितयोरिति न्यायादिति भावः। ननु तत्वेपि सान्निध्यात्स्वस्यैव विशेषणं स्यात्। किंच।
उत्तरसूत्रानुरोधेनायमेव विशेषणमुचितमत आह। व्यारम्भेति। अनुवादे इत्यस्यासार्वत्रिकत्वा
दाह। तस्मादिति। एतेन परशब्दाध्याहारेणेदं लब्धं ननु परिभाषया अनुवादे इत्यस्याजागरूकत्वादि
ति प्रकाशोक्तं स्थानिग्रहणे न परिभाषाणामनित्यत्वमात्रं तात्पर्यं तेन तु सेति इष्टस्य लेप्रवृत्तिरेवेति न
दोष इति रत्नाकरोक्तं। अवपरस्य रेफहकाराभ्यां परस्य वर इति वाच्योर्थः। न चट्पदनिमित्तता स्या
दिति वाच्यं। चकाराभावेन स्पष्टप्रतिपत्त्यर्थे चोद्दिष्टे न त्विरहाभ्यामित्येव न्यासे कार्ये ईदृशन्यासेन
च तदभावकल्पनात्। तत्रापुरपीति न्यायेनुविधेयसन्निहितत्वेन रहाभ्यामित्यत्रैव निर्दिष्टांशे बाधः।
अयद्युक्तं शेषे तु सामर्थ्यसिद्धबाधः। एवं व्याख्याने चोपस्थितरेफहकारत्वमेव गम्यते नान्यदुक्तं तदेतत्फलि
तमाह। अचः परस्मादिति। एतेनानुवादपरिभाषाणामनुपस्थितेरिदमनुपपन्नमित्यपास्तमिति के
चिदुक्तं च परास्तं। इति भाव इत्यनेन सूचितामरुचिं प्रकटयन्नाह। दीर्घादिति। अत एव तु। यथात्रा
ग्रहणं ज्ञापकमिति। तन्न। तस्य प्रत्याख्यानात्। तथा च भाष्यारम्भानमेव शरणं तदुक्तमन्नाह। स्पष्ट
ा। अपत्यार्थे ण्य आपत्यस्येति सिद्धत्वादाह। शेषार्थेति। मवाद्यर्थेस्यर्थः। तदेतदाह। अपत्येति। न
निवर्त्तं। हर्वत्रेति निषेधात्। नन्वेवं हय तैतोम यतइत्यादौ वांतो यीति यणः प्रसंगो यपासं रव्य

सादतआह। अवावादिति। मात्रालाघवस्यावांतरपद[illegible]लमादायापि पदलाघवस्यव सत्वेप्यपाणि
नीयत्वादिह याक् विरा[illegible]कुटिलेनेनसूचिता। नन्वेवं यथासंख्यसूत्रमत्रे वोचितमितिचेन्न। अन्या
र्थमत्रे वावश्य[illegible] कथास्यानेंतरतमइत्यनयैव निर्वाह इति सूत्रनार्थं तदनुपन्यासात्। एवं च क्रमा
दितिफलितार्थकथनं तद्धुनयन्नाह। उक्तेति। अत्र भाष्यसंमतिं तत्र तद्विरोधं चाह। एतदिति। भा
ष्यइति उक्ता[illegible]न्वयः। प्रकृते सूत्रे इत्यस्य व्यवस्थायामन्वयः। नन्वकारस्य विवृतोपदेशस्ये
वशास्त्रेकरणात्संवृतावर्णस्य लुक्ते युमतः केयटाद्यसंगतिं ध्वनयन्नाह। एतदिति। प्रकर्णीवधि
माह। ऐओइत्यतइति। संवृतत्वात्तमेव। एतदंशे। इकारादंशे एव। नन्वेवं लोके प्रयोगे तद्धत्र
स्यापि स्पष्टमेव भासः स्यादत आह। तद्रूपेति। च स्वर्थे। नतेन तेन तस्यापि भावइति भावः। अपिने
तरांशस्य समुच्चयः। अत एव वैलक्षण्यसूचकं सकर्णीनुपयोगमाह छिन्नायनुरोधो[illegible]ह। विवृतेति। तत्र
तु तावन्मात्रेण न सिद्धिरिति प्रकर्णीश्रय[illegible]णमिति भावः। भाष्ये प्रत्येकोत्यादिति सूत्रस्थः। एतेन तये
व सिद्धे तस्य ग्रहणं व्यर्थमेवेति प्राचोक्तमपास्तं। तदाह। दीर्घ इति। फलाभावादिति। लोपान्यलोपैक
फलाभावादित्यर्थः। लोपस्तु न फलमित्यन्यत्र स्पष्टं। स्वरूपतः सप्तमी एतद्ध्वदतो निमित्तमिति सूत्र
यन्नाह। तस्मादिति। आदिना नेदुत्पिक[illegible]तीत्यादिपरिग्रहः। वार्त्तिककृदुक्तवादे वाह। वाचेति। एते
नान्यथास्म सिद्धिरिति प्राचोक्तमपास्तं। यथा चैतत्तथा प्रतिपादितं भावप्रकाशे। मनोरमार
त्नाकरदंड्यायुक्तेरसांगत्यध्वनन[illegible]नेति। तात्पदार्थेत्यर्थः। ननु तस्य[illegible]लो

तस्यभ
यस्त्वे ८

व्यो ७
हार ५

सि०
७४

चनेतर्ह्यपि स्यादत आह। यथेति। तथा च सामान्यतोपि वाक्यार्थबोधो नेतदुपयोगीति। ननु नत्सहकारिणबोधा
वधूकत्वं प्रागुक्तरीत्या स्यान्नेतरद् इत्यनयैव निर्वाहादत आह। अंतरेति। एवं च तत्रापि न मानमिति भा
वः। कैयटयोर्मिथो विरोधमपि स्वयमाह। अतएवेति। [illegible] वार्तिकोपपा
दकोऽयं ग्रंथः। उक्तरीत्या गत्यमित्यत्र लोपाप्राप्तेराह। ननु गत्यतिरिति। तस्यासिद्धत्वात्तत्र वकारग्र
हणाननुवृत्तेश्च हलोपात्। एतेन विपरीतरत्नाकरोक्तिरपास्ता। नवसदादीनाम् इत्यत्रैव वार्तिकद्वय
पाठेन भवदभिमतसिद्धौ अत्र पाठसामर्थ्यादेव नवलोप इति प्रश्नोपादिवैयर्थ्यमिति वाच्यं। उपाय
स्योपायांतराद्दूषकत्वात् प्रक्षेपतः सामर्थ्यकल्पिताद्वर्वचनांगीकारे गौरवात्। सामर्थ्ये न सर्वथा
प्रासत्वबाधकल्पनापेक्षया पाक्षिकारिपाठे तदंतविध्याप्रयोगाद्दिनाव्यवीभावविनतद्धितार्थवि
षयत्वस्वरूपस्य समाहारद्वंद्वे वैकल्पिकत्वमिति न्यायेनेतरेतरद्वंद्वे स्वतत्त्वं गोंतत्वस्य सत्वेन तस्याप्रयोगत द
देशावस्थाऽनिष्टरूपापत्तिश्चेतिदिक्। बाधइति। तथा च सूत्रे बहुवचनापत्तिरिति भावः। तद
प्राप्तियोग्यत्वाद्वा परितार्थ्यस्य तद्धीजत्वादाह। निमित्तस्येति। ननु येन नेति न्यायेन बाध्येत त
थासत्वेपि प्रकृते तत्रोक्तो येन न्यायेन बाध्योऽत आह। तत्रेति। येन येन नेति न्यायस्य मूलवृत्तयः।
तत्र इति। तत्र हि क्रोष्टुगस्तद्वस्याहावंस्योपधारूपत्वान्निर्बाधवचनेनोक्तोन्यायेन तया
सादिवृध्याबाधमार्थकांक्षदृष्टांतेनाप्राप्तिसत्वेपीत्सोऽकृतदलादोरयोरप्राप्त्यातदनावद्दुल
त्वं। सामान्यविशेषभावोबाध्यहेतुः सत्वेहनोस्तीति कैयटः। निमित्तं संप्रीरसत्वे पिकार्ये द्वौ

तदभाव इति तदाकूतं। आद्ये स्पष्टत्वादाह। अलेइति। पालोरि[illegible]व इलत्रे सर्थः। उत्तरबो दिति। नित्यं लोनुपसंदेस
न यो रित्यर्थः। तस्या[illegible]ग्येप्यनुवृत्तिरिति भावः। ननु तेभ्यः क्रियासमभिहारे लित्वं यथास्मादिति तदावश्यकमत आ
ह। क्रियेति। समुच्चयाभावादाह। वेनेति। अन्यथा तस्य सावकाशत्वे विनचोदितो क्रियासमभिहारादित्येव [illegible] ख्योतत्यात
द्वेधातोरित्यर्थे नानुवाद्यत्वं न विधेयत्वं क्रियासमभिहाराविवक्षायां ताद्रित्याथ्येव तत्रापि तत्रैव सीते
न सिध्यता तदानर्थक्यमिति नित्यग्रहणं प्रत्याख्यातं। तदाह। निरूपेति। प्रकृतमाह। तस्यन्वेति। प्रक्लिप्तत्व
स्यवेत्यर्थः। तत्ताविति जोरित्यादिनामध्यलोपमर्थमाह। [illegible] आवेति। सूत्रे तद्विषये तस्य प्रसंगे प्रवृत्तिः
सव द्विविधः तद्धितलक्षा तत्राद्ये आह। गव्यादाविति। भवेनेति। बोध्यनेति। वाध्येति शेषः। द्वितीये आह।
लभेइति। सतएवेति। तद्वयप्रासेरे वेत्यर्थः। उभयमि च्वेपि तत्र न फलमित्याह। गोरइति। आदिना
क्यङ् परिग्रहः। एवं सर्वत्राशयं प्रतिपाद्योत्तर[illegible]पक्षमवतारयति। एवं तर्हीति। तत्रैव फलसत्वे
वेत्यर्थः। लाघवादिति भावः। ननु लोपो व्योरित्यत्र वकार प्रत्याख्यानात्कथमिष्टसिद्धिरत आह। लोप
इति। इदं प्रमाणयति। अतएवेति। कइति। सिद्धं तरंगत्वांगीकारे ट्लावीदित्यादि सिध्यपर्थमिति भावः।
लौकिकत्वनिरासायाह। शास्त्रीयेति। अनतिप्रसंगायाह।। सौत्रेति। नवेवमिति। वार्त्तिकउक्तरी
सा तथापथ्यंगीकारे इत्यर्थः। आदिना सजातीयपरिग्रहः। मूलं खंडयति। परिति ति। सेति। इको
गुणेति सूत्रस्येत्यर्थः। सिद्धं तरंगस्यन्यायेन वाधात्रस्यत त्वमिति स्पष्टमन्यत्र। एवं च वकारप्र
सारखान संकोचोनयुक्त इति लोपा[illegible]वेति। नन्वस्तु प्रकारांसंगतिस्त्वपा

पितत्र लोपकारणं क[illegible]पमतम्आह। किं वेति। तत्रादलवाद्यवार्त्तिकविषयेमाह। छंदसीति। द्वितीयेऽर्थे है। अत्र
चेति। अध्यवपरिमाणेपि तत्र गव्यूतौ संज्ञायां गापत्रेर्नवलोपइत्यन्वयः। तत्रहेतुमाह। संज्ञेति। यत्तोर
तइत्याद्यंतो। एवमन्यत्रापि इष्टमावश्यकमित्याह। यथेति। इत्वेपदान्तसंज्ञायामिति प्राप्तस्येसर्पः।
नन्वेवं सर्वनामशब्दे गणत्वाशंकापरंमाव्वविरोधोट तम्आह। सर्वेति। युक्तिसंभवे वैज्ञातकल्पनानोचि
तेत्याशयेनाह। तस्येति। तत्र चिरंतनसात्वादाह। आधुनिकेति। दीनीति सूत्रेइति पाठः। एतेनसं
ज्ञात्सर्वकेइति लोपःशाकल्यस्येत्यस्यच [illegible] स्थितविभाषात्वाद्ध नलोपइति प्रकाशकारत्वाकरादयुक्त
मपास्तं। मात्रपदेनसामान्यनियममववच्छेदः। स्वादिष्विति सेभावनायां। तथाचैवइत्यनुवृत्त्यायमा
तिभावः। तत्रादेत्तस्याव्याप्तिमाह। तथाचेति। अतिव्याप्तिमाह। आयतइति। प्राचोक्तिं खंडयति।
